18 D6 om. 18 (cf. v. l. 14). — ^{a}) B Dc1 Dn1 D3 T G2–4 M3–5 तु तं (for ततः). — ^{b}) G2 M3–5 तूर्णम् (for भूमिम्). B Dc1 Dn1 D2 अवर्तयत्; Dn2 D3–5. 7. 8 अ(D3 उ)पाहरत् (for अपातयत्). Ś K (K5 missing) D1 रथात्तूर्णमवातरत्. — ^{c}) Some MSS. निश्वसंतं. D8 (*sup. lin.* as in text) तथा (for यथा).

19 ^{a}) Ś2 K1. 2 Dn1 G1 M1. 2. 4 यथा; G2 तदा (for यदा). D6 च (for स). D3 यच्चोपकृष्टः स रथान्. — ^{b}) K1. 2 प्रति; Dn2 S (G5 missing) युधि; D6 बलात् (for भुवि). D2 आसितश्चायुधो युधि; D4. 5. 7. 8 न्यासि(D5 °शि)तान्यायुधानि च. — ^{c}) Ś2 K1. 2 तदा (for ततो). D3. 6 तु (for तत्). — After 19, Ś1 K3 ins. an addl. colophon [Śloka No.: Dc1 Dn1 19].

20 Before 20, B Dc1 Dn1 D3. 5 S (G5 missing) ins. संजय उवाच. — ^{a}) D4. 5. 7. 8 विधिवत्; D6 बलिनि; G1 M1. 2 योगेन (for विधिना). — ^{b}) K4 B Dc1 Dn1 S (G5 missing) तेन; Dn2 D4. 5. 7. 8 तथा; D2 तस्मिन्; D3 तस्य; D6 महा- (for तदा). S (G5 missing) दुःषहे. — D6 om. 20^{c}–22^{b}. — ^{c}) D3 निर्मलाः (for विमलाः). — ^{d}) S (G5 missing) विदिश (for प्र°). K3 वा (for च).

21 D6 om. 21 (cf. v. l. 20). — ^{b}) B2 S (G5 missing) शांताश्च (for प्रशान्ता). — ^{c}) Dn2 S (G5

बभौ भीमो निशापाये धीमान्सूर्य इवोदितः ॥ २२
हतशेषं बलं तत्र पाण्डवानामतिष्ठत ।
अस्त्रव्युपरमाद्धृष्टं तव पुत्रजिघांसया ॥ २३
व्यवस्थिते बले तस्मिन्नस्त्रे प्रतिहते तथा ।
दुर्योधनो महाराज द्रोणपुत्रमथाब्रवीत् ॥ २४
अश्वत्थामन्पुनः शीघ्रमस्त्रमेतत्प्रयोजय ।
व्यवस्थिता हि पाञ्चालाः पुनरेव जयैषिणः । २५
अश्वत्थामा तथोक्तस्तु तव पुत्रेण मारिष ।
सुदीनमभिनिःश्वस्य राजानमिदमब्रवीत् ॥ २६
नैतदावर्तते राजन्नस्त्रं द्विर्नोपपद्यते ।
आवर्तयन्निहन्त्येतत्प्रयोक्तारं न संशयः ॥ २७
एष चास्त्रप्रतीघातं वासुदेवः प्रयुक्तवान् ।
अन्यथा विहितः संख्ये वधः शत्रोर्जनाधिप ॥ २८
पराजयो वा मृत्युर्वा श्रेयो मृत्युर्न निर्जयः ।

C. 7. 9286
B. 7. 200. 29
K. 7. 201. 31

missing) प्रहृष्टा(G2 °सन्ना)नि (for च हृ°). —d) K1 योधश्र् (for योधाश्र्). Dn2 मनुजेश्वरः. B Dc1 Dn1 T G1-4 M3-5 प्रशांतेस्त्रे सुदु(G4 तु दु)र्जये; M1.2 प्रशांतेस्त्रेषु दुर्जये.

22 D6 om. 22ab (cf. v. l. 20). —a) D2 विपाठे च; D5 व्यपयाते (for व्यपोढे च). D4 lacuna; S (G5 missing) तु (for च). Dn1 D3 G2 तथा; T G3.4 तदा (for ततो). —b) K4 om. from तेज up to दितः (in 22d). B4 तमसि (for तेजसि). Ś1 K3 भासुरे; Ś2 K2 D1 भास्वरे; K1 भास्करे (for भारत). T G1.2.4 M तस्मिंस्तमसि दारुणे; G3 तस्मिंस्तमविदारुणे (sic). —c) D7.8 महाबाहुर् (for निशापाये). —d) Ś1 K1.2 D1.3 श्रीमान्; D4.5 वने; D6 दिवि; D7.8 यथा (for धीमान्).

23 a) D2 तत्तु (for हत-). Dn2 -शेष- (for -शेषं). B Dc1 Dn1 S (G5 missing) तत्तु; D6 तं तु (for तत्र). —b) D3 पांचालानाम् (for पाण्डवानाम्). Ś2 Dn D7 अतिष्ठति (Dn1 °ते); G1 अधिष्ठतः; G2 व्यतिष्ठत; M1.2 अतिष्ठतः (for °ष्ठत). —c) D3 शस्त्र- (for अस्त्र-). B1 G1 -व्युपारमद् (sic). Ś1 K3 हृष्टस्. B4 अस्त्रव्युपरमा ह्येवं; Dn T1 M अस्त्रव्युपरमं दृष्ट्वा; D2.6 अस्त्रं व्युपरतं दृष्ट्वा; D4.5.7.8 अस्त्राभ्युपरमं दृष्ट्वा; T2 G2-4 अस्त्रं ह्युपारमत्सृष्टं. —d) Ś1 पुत्रो (for पुत्र-).

24 a) Ś1 K3 व्यवस्थितो (for °स्थिते). G1 हते (for बले). —b) Ś1 K3 B2 T तदा (for तथा). D3 घोरे तमसि भारत. —d) Ś2 K1.2.4 D1 अभाषत (for अथाब्रवीत्).

25 a) D4 पुरः (for पुनः). D2 इदम् (for शीघ्रम्). —b) Dn2 om. मस्त्रं. S (G5 missing) एतदस्त्रं (by transp.). —c) B5 Dc1 Dn1 अवस्थिता (for व्यव°). D1.7 पंचालाः. —d) K4 B Dc1 D1.6 S (G5 missing) एते (for एव).

26 a) D2 च (for तु). —b) D4.5.7.8 पुत्रेण तव (by transp.). —c) B5 D6 स (D6 सु-) दीर्घम्; Dn2 G1 M1.2 स दीनम् (for सुदीनम्). Dn2 T G2 अति-; D6 अथ (for अभि-). Some MSS. -निश्वस्य. D3 दीर्घमुष्णं च निःश्वस्य.

27 a) D1 तैस्तद् (for नैतद्). D4.5.7.8 व्यावर्तते (for आव°). —b) D4 बुद्धिर्नैव; D5 द्विर्वास्त्रं च (for अस्त्रं द्विर्न). B5 D3 नोपदृश्यते; D6 S (G5 missing) नो(G1.3 M1.2 वो)पदिश्यते (for °पद्यते). —c) B1.3 Dc1 Dn1 आवृतं हि (Dn1 तं) (for आवर्तयन्). Dn2 D2.4 विहंत्येतत्; D1 निर्हन्त्येतत् (sic); D3 हि दह्यते; D5.6 हि हंत्येतत्; T G1-4 M1.2 हि दहेत; M3-5 हि हन्येत (for निहन्त्येतत्). Ś2 आवर्तन्विनिहंत्येतत्; B2 प्रवर्तयन्निवर्तेत; B4 आवृतं हि निवर्तेत; B5 आवर्तनं हि हन्येत; D7.8 आवर्तनाद्धि हंत्येतत्. —d) T G3.4 प्रयोक्तैव; G1 M1.2 प्रयोक्ता वै (for °क्तारं). M3-5 प्रयोक्ता नात्र संशयः.

28 a) Dn2 D2.4-6 एवं; D3 अयम् (for एष). D3 अस्त्र- (for चास्त्र-). Dn1 M4 -प्रतिघातं; M1.2 -प्रतीघातः (for °घातं). —b) T G1.3.4 M केशवोयं (for वासुदेवः). Ś K1-3 D1 प्रतापवान् (for प्रयुक्त°). G2 केशवोर्जुनमुक्तवान्. — After 28ab, S (G5 missing) ins.:

1410* अस्त्रस्य तु ह्येष वेद मानुषेषु न विद्यते ।
परावरज्ञो लोकानां न तदस्ति न वेत्ति यत् ।
तदेतदस्त्रं प्रशमं यातं कृष्णस्य मन्त्रिते ।

[(L. 1) G3.4 अस्य तु ह्येष वै दाता (for the prior half). M3-5 मानुषोन्यो (for °षेषु). —(L. 2) M4 परावज्ञो हि (for °वरज्ञो). —(L. 3) G1 M तथैतद् (for तदे°).]

—cd) Dn2 D4.5 अतो न; D6 तथा च; D7.8 द्विविधो (for अन्यथा). D5 विहतः; D8 [ऽ]वहितः (for वि°). M3-5 transp. संख्ये (M4 °ख्ये) and शत्रोः. G1 M1.2 संख्ये. Ś1 K3 G1 M1.2 नराधिप (G1 M1.2 °पः)

C. 7. 9288
B. 7. 200. 29
K. 7. 201. 32

निर्जिताश्चारयो ह्येते शस्त्रोत्सर्गान्मृतोपमाः ॥ २९
दुर्योधन उवाच ।
आचार्यपुत्र यद्येतद्विरस्त्रं न प्रयुज्यते ।
अन्यैर्गुरुघ्ना वध्यन्तामस्त्रैरस्त्रविदां वर ॥ ३०
त्वयि ह्यस्त्राणि दिव्यानि यथा स्युस्त्र्यम्बके तथा ।
इच्छतो न हि ते मुच्येत्क्रुद्धस्यापि पुरंदरः ॥ ३१
धृतराष्ट्र उवाच ।
तस्मिन्नस्त्रे प्रतिहते द्रोणे चोपधिना हते ।
तथा दुर्योधनेनोक्तो द्रौणिः किमकरोत्पुनः ॥ ३२
दृष्ट्वा पार्थांश्च संग्रामे युद्धाय समवस्थितान् ।
नारायणास्त्रनिर्मुक्तांश्चरतः पृतनामुखे ॥ ३३
संजय उवाच ।
जानन्पितुः स निधनं सिंहलाङ्गूलकेतनः ।
सक्रोधो भयमुत्सृज्य अभिदुद्राव पार्षतम् ॥ ३४
अभिद्रुत्य च विंशत्या क्षुद्रकाणां नरर्षभः ।
पञ्चभिश्चातिवेगेन विव्याध पुरुषर्षभम् ॥ ३५
धृष्टद्युम्नस्ततो राजञ्ज्वलन्तमिव पावकम् ।
द्रोणपुत्रं त्रिषष्ट्या तु राजन्विव्याध पत्रिणाम् ॥ ३६
सारथिं चास्य विंशत्या स्वर्णपुङ्खैः शिलाशितैः ।
हयांश्च चतुरोऽविध्यच्चतुर्भिर्निशितैः शरैः ॥ ३७

(for जना°).

29 G3 om. from the second वा up to स्युर् (in 29[b]). — [b]) B Dc1 Dn1 D1.2.6 श्रेयान् (for श्रेयो). D7.8 वा मृत्यु- (for मृत्युर्न). Ś K1.2.4 D1 न संशयः; D6 विनिर्जयः; M3-5 हि दुर्जयः (for न नि°). — [c]) B Dc1 Dn1 D1.6 विजिताश् (for निर्जि°). Ś K (K5 missing) निंदिता ह्यनयोर्ह्येते (sic); D3 निंदिताश्च रथा ह्येते. — [d]) Dn1 शत्रोत्संगो; T G2-4 शस्त्रोत्सर्गे (for °त्सर्गान्).

30 [b]) D3 [उ]प- (for प्र-).

31 [a]) D3 शस्त्राणि (for ह्य°). Ś K (K5 missing) D1 सर्वाणि (for दिव्यानि). Dn2 D2.4.5.7.8 त्वयि दिव्यानि चा(Dn2 व)स्त्राणि. — [b]) D2.4 G2 तथा (for यथा). K4 [अ]श्वस् (for स्युस्). Ś1 (orig.) D2.4.7.8 G2 यथा (for तथा). B Dc1 Dn1 त्र्यंबके चा(B1 Dn1 वा)-मितौजसि; Dn2 तथा स्युरंबकेपि च. — [c]) Dc1 यच्छतो (for इ°). Dn2 D4-8 हि न (by transp.). Dn1 मुच्येत (for ते मुच्येत्). — [d]) B1.3-5 Dn1 संक्रुद्धोपि; B2 Dc1 संक्रुद्धो हि; Dn2 क्रुद्धो ह्यपि (for क्रुद्धस्यापि). — For 31[cd], S (G5 missing) subst.:

1411* ह्नतैतान्सुमहावीर्यं शात्रवान्युद्धकोविद ।

— After 31, Ś2 ins. an addl. colophon.

32 [b]) B2 च विधिना; D2.8 चापधिना (for चोप°). D3.6 द्रोणे च विनिपातिते. — [c]) K2 Dc1 D4.5.8 [उ]-क्ते (for [उ]क्तो).

33 [a]) Dn2 D4.5.7.8 तु (for च). — [b]) B (except B1) D (except D1) युद्धाय समुपस्थितान्. — [c]) D3 नारायणेन (for °यणास्त्र-). — [d]) D3 सरथान् (for चरतः). S (G5 missing) विचरंतो (M3 °न्तो) ह्यभीतवत्.

34 [a]) G1 राजन् (for जानन्). D6 स पितुः (by transp.). — [c]) D6 स क्रोधाद्; T G2-4 सरोषो; M3-5 संक्रुद्धो (for सक्रोधो). D4.5.7.8 भृशम् (for भयम्). Ś K1-3 D1.3 सक्रोधो भृशमुच्छ्वस्य (D3 °श्वस्य). — [d]) N (K5 missing) सोभि- (K2 °ति-) (for अभि-).

35 [a]) D2.7.8 अभिहत्य (for अभिद्रुत्य). D6 सामर्षं पंचविंशत्या; S (G5 missing) तमार्छत्पंचविंशत्या. — D4 om. (hapl.) 35[b]-37[a]. — [b]) Ś K (K5 missing) D1 समादयत्; B (except B1) Dc1 Dn1 D2.5.8 T G1.3.4 M नरर्षभ (Dc1 Dn1 °भं); G2 तथैव च (for नरर्षभः). — D2.6.8 om. (hapl.) 35[cd]. — [cd]) D7 -वेगैस्तु (for -वेगेन). K4 B1-4 Dc1 Dn D3.5 पुरुषर्षभः (D3.5 °भ). S (G5 missing) तच्चाशु भुजवेगेन विचकर्त (G1.2 M °र्ष) शरासनं.

36 D4 om. 36 (cf. v. l. 35). Dc1 Dn1 om. 36[ab]. — [a]) D6 धृष्टद्युम्नं ततोविध्यज्. — [b]) D7 ज्वलतम् (for °न्तम्). — After 36[ab], D6 ins. a passage given in App. I (No. 22). D6 om. 36[c]-46[d]. — [c]) Ś K1-3 D1 ततः षष्ट्या; Dn2 चतुःसध्या (sic); D3 त्रिषष्ट्या च; D5.7.8 चतुःषष्ट्या; G2 तु विव्याथ (for त्रिषष्ट्या तु). — [d]) T विव्याथ (for °ध). K4 D5 G1 पत्रिणा (for °णाम्). G2 त्रिषष्ट्या चैव पत्रिणां.

37 D4 om. 37[a] (cf. v. l. 35). D6 om. 37 (cf. v. l. 36). — [a]) T G2.4 विव्याथ; G1.3 M विव्याध (for विंशत्या). — [b]) D2 स्वर्णपत्रैः (for °पुङ्खैः). Dn1 D8 शिलासितैः; D7 सितासितैः (for शिलाशितैः). — D2.4 om. 37[cd]. — [c]) D5 विद्धा (for ऽविध्यच्). — [d]) D3 च (for नि-).

विद्धा विद्धानदद्द्रौणिः कम्पयन्निव मेदिनीम् ।
आददत्सर्वलोकस्य प्राणानिव महारणे ॥ ३८
पार्षतस्तु बली राजन्कृतास्त्रः कृतनिश्रमः ।
द्रौणिमेवाभिदुद्राव कृत्वा मृत्युं निवर्तनम् ॥ ३९
ततो बाणमयं वर्षं द्रोणपुत्रस्य मूर्धनि ।
अवासृजदमेयात्मा पाञ्चाल्यो रथिनां वरः ॥ ४०
तं द्रौणिः समरे क्रुद्धश्छादयामास पत्रिभिः ।
विव्याध चैनं दशभिः पितुर्वधमनुस्मरन् ॥ ४१
द्वाभ्यां च सुविकृष्टाभ्यां क्षुराभ्यां ध्वजकार्मुके ।
छित्त्वा पाञ्चालराजस्य द्रौणिरन्यैः समार्दयत् ॥ ४२
व्यश्वसूतरथं चैनं द्रौणिश्चक्रे महाहवे ।
तस्य चानुचरान्सर्वान्क्रुद्धः प्राच्छादयच्छरैः ॥ ४३
प्रदुद्राव ततः सैन्यं पाञ्चालानां विशां पते ।
संभ्रान्तरूपमार्तं च शरवर्षपरिक्षतम् ॥ ४४
दृष्ट्वा च विमुखान्योधान्धृष्टद्युम्नं च पीडितम् ।
शैनेयोऽचोदयत्तूर्णं रणं द्रौणिरथं प्रति ॥ ४५
अष्टभिर्निशितैश्चैव सोऽश्वत्थामानमार्दयत् ।
विंशत्या पुनराहत्य नानारूपैरमर्षणम् ।

C. 7. 9303
B. 7. 200. 46
K. 7. 201. 49

38 D6 om. 38 (cf. v. l. 36). —[a]) D4 व्यध्वा व्यध्वा (sic). Ś K (K5 missing) D1-4. 7. 8 ततो; Dn1 नदन्; T G2-4 पुनर् (for [अ]नदद्). K3. 4 Dn2 D3. 4 T G2-4 द्रौणिं. D5 अविध्यत ततो द्रौणिं. —[c]) B (except B5) Dc1 Dn D2. 4. 5 आददे; D3 प्राददत् (for आद°). —[d]) Ś1 K3 महाहवे (for °रणे).

39 D6 om. 39 (cf. v. l. 36). —[a]) B1 च (for तु). Ś1 K3 रणे; D2 बळाद् (for बली). S (G5 missing) पुनश्च पार्षतो राजन्. —[b]) M3-5 कृतास्त्रं (for °स्त्रः). Ś K1-3 D1 जित- (for कृत-). K3. 4 B Dc1 Dn D2-5. 7. 8 -निश्रयः; some MSS. -निःश्रमः. —[d]) K2 D4. 5. 7. 8 कृत्वा मृत्यु-; B Dc1 Dn1 D1 M3-5 मृत्युं कृत्वा (by transp.).

40 D6 om. 40 (cf. v. l. 36). —[a]) D4 om. मयं.

41 D6 om. 41 (cf. v. l. 36). —[a]) K4 B (except B5) Dn2 क्रुद्धं; T G2-4 M4 वीरं; G1 M1. 2 राजन्; M3. 5 वीरश्च (for क्रुद्धश्च). —[d]) D5 पुनर्विव्याध चाष्टभिः.

42 D6 om. 42 (cf. v. l. 36). —[a]) Ś2 सुविशिष्टाभ्यां; K3. 4 B Dc1 Dn D4. 5. 7. 8 T1 सुवि(Dn2 स वि)सृष्टाभ्यां; T2 G1-4 M स (G1. 3 M सु-) विशुद्धाभ्यां (for सुविकृष्टाभ्यां). D2 द्वाभ्यां राजन्विसृष्टाभ्यां. —[b]) Ś1 K3 भल्लाभ्यां; D4. 5 क्षुद्राभ्यां; D8 एकैके; G1 M शराभ्यां (for क्षु°). Dn1 -कार्मुकं (for °के). D2 क्षुद्रकाभ्यां हि कार्मुकं; T2 G1-4 ध्वजं कार्मुकमेव च. —[c]) Ś K1-3 D1 भित्त्वा (for छित्त्वा). S (except G2; G5 missing) -पुत्रस्य (for -राजस्य). —[d]) B2. 4 S (G5 missing) सम(B2. 4 °मा)र्पयत्; D2 समर्पयेत्; D4. 5. 7 तमर्दयत्; D8 तु मर्द° (for समार्द°).

43 D6 om. 43 (cf. v. l. 36). —[a]) M3-5 -हयं (for -रथं). K2 B1 Dn2 D3. 4. 7. 8 चैव; D5 चक्रे (for चैनं). —[b]) D5 अन्यैर् (for चक्रे). Ś1 महारणे; Dc1 °रथः (for °हवे). —[c]) D1 चानुचरः; D4 तानवरान् (for चानुच°). —[d]) Ś2 K1. 2 D1. 4. 5 प्रच्छादयन् (K1. 2 D1 °त्); B Dc1 Dn1 प्राद्रावयत्; D7. 8 प्रा(D8 प्र)द्रावयन् (for प्राच्छादयत्). S (G5 missing) द्रौणिर्व्यायच्छदाशुगैः.

44 D6 om. 44 (cf. v. l. 36). —[a]) B Dc1 Dn1 S (G5 missing) ततः प्रदुद्रुवे सैन्यं; D2 तद्द्रावयतं सैन्यं (sic); D4 तं दुद्राव ततः सैन्यं. —[b]) B5 D1 पंचालानां; D5 महात्मनां. B4 भयार्तं सर्वतोदिशं. —[c]) B1. 2. 5 संत्रस्त- (for संभ्रान्त-). Ś K (K5 missing) D1 -रूपमात्रं (for -रूपमार्तं). Ś2 K2 तु (for च). S (G5 missing) संभ्रांतमार्तरूपं च. —[d]) D4. 5. 7. 8 -परिक्षितं (for °क्षतम्). B1-3. 5 Dc1 Dn1 न परस्परमैक्षत; B4 S (G5 missing) परस्परमवेक्षत; D2. 3 शरवर्षं प्र(D3 °र्षम)तिक्षतं.

45 D6 om. 45 (cf. v. l. 36). —[a]) K3. 4 B Dc1 Dn D3 T G1-4 M1. 2. 4 तु (for च). D8 घोरान्; G1 M यौधान् (for यो°). Ś K1-3 D1 दृष्ट्वा च विमुखं सैन्यं. —[b]) B1 पार्षतं; G3 मोहितं (for पीडितम्). —[c]) Ś2 चोदयंस्; D2 [ऽ]चालयत्; D5 [ऽ]द्राव°; D7. 8 [ऽ]नोद° (for ऽचोद°).

46 D6 om. 46 (cf. v. l. 36). —[a]) B1. 2. 5 Dc1 Dn1 D2-5. 7. 8 G1 M अष्टाभिर् (for अष्ट°). Ś2 T G3. 4 M3-5 चापि; B Dc1 Dn1 G1. 2 M1. 2 बाणैः (for चैव). —[b]) B Dc1 Dn1 D1 G1 अश्वत्थामानम् (for सोऽश्वत्था°). T G1-4 M3-5 अर्दयत् (for आर्द°). —[c])

C. 7. 9304
B. 7. 200. 47
K. 7. 201. 49

विव्याध च तथा सूतं चतुर्भिश्चतुरो हयान् ॥ ४६
सोऽतिविद्धो महेष्वासो नानालिङ्गैरमर्षणः ।
युयुधानेन वै द्रौणिः प्रहसन्वाक्यमब्रवीत् ॥ ४७
शैनेयाभ्यवपत्तिं ते जानाम्याचार्यघातिनः ।
न त्वेनं त्रास्यसि मया ग्रस्तमात्मानमेव च ॥ ४८
एवमुक्त्वार्करश्म्याभं सुपर्वाणं शरोत्तमम् ।
व्यसृजत्सात्वते द्रौणिर्वज्रं वृत्रे यथा हरिः ॥ ४९
स तं निर्भिद्य तेनास्तः सायकः सशरावरम् ।
विवेश वसुधां भित्त्वा श्वसन्बिलमिवोरगः ॥ ५०
स भिन्नकवचः शूरस्तोत्रार्दित इव द्विपः ।
विमुच्य सशरं चापं भूरिव्रणपरिस्रवः ॥ ५१
सीदन्रुधिरसिक्तश्च रथोपस्थ उपाविशत् ।
सूतेनापहृतस्तूर्णं द्रोणपुत्राद्रथान्तरम् ॥ ५२
अथान्येन सुपुङ्खेन शरेण नतपर्वणा ।

Ś2 K2 आवृत्य; K1 आहृत्य; G2 आविध्य (for °हृत्य). —ᵈ) K4 Dn2 अमर्षिणं; B Dc1 Dn1 D7. 8 अमर्षणः; D1 °र्षणैः (for °र्षणम्). — D8 om. (hapl.) 46ᵉ–47ᵇ. —ᵉ) D2. 4 विव्यधे (D4 °थे); T G2 विव्याथ (for °ध). Ś K (K5 missing) D1 ततः (for तथा). — After 46, K4 Dn2 D1. 5 ins. a passage given in App. 1 (No. 23).

47 D8 om. 47ᵃᵇ (cf. v. l. 46). D6 reads 47–48 after line 32 of App. 1 (No. 22). —ᵃ) B5 सोपि (for सोऽति-). —ᵇ) D4–7 G1 M1. 2 -रूपैर् (for -लिङ्गैर्). —ᶜ) K3 D2–8 युयुधानं ततो (K3 °नमथो; D3 °ने तु वै) द्रौणिः.

48 For the sequence in D6, cf. v. l. 47. —ᵃ) K1 [अ]त्यवपत्तिं (sic); K4 B Dc1 Dn1 D2. 3. 6 [अ]भ्युपपत्तिं; Dn2 [अ]त्युपपत्तिं; D4. 5. 7. 8 [अ]भ्युपपन्नं (for [अ]भ्यवपत्तिं). Ś K1. 3 D1. 4. 5. 7. 8 त्वां; K2 त्वं; Dc1 Dn1 तु (for ते). G3 शैनेयेनाभ्यवपत्तिं ते (hypermetric). —ᵇ) K2 Dn1 जानासि (for °मि). Ś1 K3 Dn2 D1. 4. 5. 7. 8 -घातिनं; Ś2 K1. 2 B4. 5 D3 -घातिनीं; K4 B2. 3 D2. 6 G1 M1. 2 -घातिनि (for -घातिनः). —ᶜ) Ś K1–3 D3 न त्वेव (K1 °वं); K4 B Dc1 Dn D2 न चैनं; D1 नन्वेवं; D6 G2 M3. 4 न त्वैनं; D8 नन्वेनं (for न त्वेनं). D7. 8 ज्ञास्यसि; M5 त्रास्यति (for त्रास्यसि). T G3. 4 न त्वेवं (G3 त्वैनं; G4 त्वेनं) मृत्युना वेत्सि. —ᵈ) D1. 4. 5. 7. 8 त्रस्तम् (for ग्रस्तम्). Ś1 K3 lacuna for आत्मानम्. — After 48, N (except D6; K5 missing) T1 ins.:

1412* शपेऽऽत्मनाहं शैनेय सत्येन तपसा तथा ।
अहत्वा सर्वपाञ्चालान्यथा शान्तिमवाप्नुयाम् ।
यद्बलं पाण्डवेयानां वृष्णीनामपि यद्बलम् ।
क्रियतां सर्वमेवेह निहनिष्यामि सोमकान् ।

[(L. 1) K2 (marg.) B5 Dn2 D3 T1 स्वयं शपेयं; Dn1 शपे*वाह; D2 शपे ममाह; D4. 5. 7 शपेयं मम; D8 व्यनयं मम (for शपेऽऽत्मनाहं). D1. 7. 8 सत्येन शैनेय (by transp.); D5 सैन्येन शैनेयं. — (L. 2) D1 -पंचालान् (for -पाञ्चा°). B Dn2 D1. 2. 4. 5. 7. 8 T1 यदि; Dc1 Dn1 D3 न हि (for यथा). K1. 2. 4 Dn2 अवाप्नुयात्; B1. 3–5 Dc1 Dn1 D1 अहं लभे; B2 उपालभे (for अवाप्नुयाम्). — (L. 3) D4 om. the prior half. Ś1 K1–3 D1. 8. 5 कृत्यं; Ś2 कृतं (for बलं). — (L. 4) D4 सर्व- (for सर्वम्). Ś2 एवाहं; K2 एवं हि; D4 -समरे (for एवेह). D5 क्रियतां समरे सर्वं (for the prior half). K4 सायकान् (for सोम°). B4 निहनिष्येपि सोमकान्; Dn1 D4. 5. 7. 8 हनिष्यामि ससोम° (for the post. half).]

49 Before 49, Ś K (K5 missing) Dn2 D1. 3. 7. 8 ins. संजय उवाच. —ᵃ) K1 -रथ्याभं; B1 Dc1 Dn2 D2. 5. 7. 8 -रश्माभं (for -रश्म्याभं). D6 ततोर्करश्मिप्रतिमं. —ᵇ) B (except B5) Dc1 Dn1 सुतीक्ष्णं तं; G1 सुवर्माणं; M5 (*sup. lin.*) सुवर्माणं (for सुपर्वाणं). G1 M1. 2 सुतेजसं (for शरोत्तमम्). —ᶜ) K2 व्यजृंभत् (for व्यसृजत्). B2–4 Dc1 Dn1 G4 M3. 5 सात्यकौ; B5 पार्षते; D6 T G3 M4 सात्यके (M4 °केर्); G1. 2 M1. 2 सत्यके (for सात्वते).

50 ᵃ) Ś K1–3 D1 स तु; D2 ततो (for स तं). D1 तेनास्त-; D2 तेनासौ; D4. 5 तेनाशु; G1 M1. 2 शैनेयं (for तेनास्तः). —ᵇ) D6 सात्यकेः (for सायकः). Ś2 lacuna; D6 स्म (for स-). D2. 8 -शरासनं; T G3 M3–5 °वरः (for °वरम्). D4. 5 सशरं सश(D5 सश)रासनं. —ᶜ) D2 तूर्णं (for भित्त्वा). —ᵈ) D6 S (G5 missing) श्वसन्निव महोरगः.

51 ᵃ) B4 प्र- (for स). —ᵇ) D6 तोत्राहत इवार्दितः. —ᶜ) Dn1 विसृज्य (for विमुच्य). G2 विमुच्य सशरावारं. —ᵈ) B -परिश्रुतः; Dn D3–5. 7. 8 °श्रवः (for °स्रवः). D6 मुष्टिदेशान्महारथः.

52 ᵃ) Ś1 K8 -दिग्धस्तु (K8 °श्च); Ś2 -सक्तश्च; D8

आजघान भ्रुवोर्मध्ये धृष्टद्युम्नं परंतपः ॥ ५३
स पूर्वमतिविद्धश्च भृशं पश्चाच्च पीडितः ।
ससाद युधि पाञ्चाल्यो व्यपाश्रयत च ध्वजम् ॥ ५४
तं मत्तमिव सिंहेन राजन्कुञ्जरमर्दितम् ।
जवेनाभ्यद्रवञ्शूराः पञ्च पाण्डवतो रथाः ॥ ५५
किरीटी भीमसेनश्च वृद्धक्षत्रश्च पौरवः ।
युवराजश्च चेदीनां मालवश्च सुदर्शनः ।
पञ्चभिः पञ्चभिर्बाणैरभ्यघ्नन्सर्वतः समम् ॥ ५६
आशीविषाभैर्विंशद्भिः पञ्चभिश्चापि ताञ्शरैः ।
चिच्छेद युगपद्द्रौणिः पञ्चविंशतिसायकान् ॥ ५७
सप्तभिश्च शितैर्बाणैः पौरवं द्रौणिरार्दयत् ।
मालवं त्रिभिरेकेन पार्थं षड्भिर्वृकोदरम् ॥ ५८
ततस्ते विव्यधुः सर्वे द्रौणिं राजन्महारथाः ।
युगपच्च पृथक्चैव रुक्मपुङ्खैः शिलाशितैः ॥ ५९

C. 7. 9335
B. 7. 200. 78
K. 7. 201. 80

G1. 3. 4 M -रक्तश्च (for -सिक्तश्च). D6 आसीद्रुधिरसिक्तांग-. — b) G2 इवाविशत् (for उपावि°). — B4 om. 52cd. — c) Ś1 स तेन (for सूतेन). S (G5 missing) दूरं (for तूर्णं). D6 तं सूतोपाहरत्तूर्णं. — d) Dc1 Dn1 अनंतरं; Dn2 रथांतरे (for रथान्तरम्).

53 a) Dn2 D3 स- (for सु-). D6-8 तस्मिन्नपहृते द्रौणिः. — b) K2. 4 B Dc1 Dn D2. 3 T [आ]नत-; D5 शित- (for नत-). — c) D6 संमर्दितो (for आजघान). K2 D2 भृवोर् (sic) (for भ्रु°). — d) D6 G4 धृष्टद्युम्नः (for °द्युम्नं). Dn1 परंतप.

54 D6 om. 54a–56b. — a) D3 अभि- (for अति-). D3 तु (for च). D2. 5 स पूर्वपरि(D5 °र)विद्धश्च; S (G5 missing) पूर्वमेवानुवि(G1 M °व तु वि)द्धश्च. — b) Ś1 K3 D7. 8 च (D7. 8 स) मर्षितः; Ś2 K1. 2. 4 D1 अमर्षितः; Dn2 सुमर्दितः; D2. 4 समर्पितः; D3 समार्दितः; G1 M1. 2 च पीडितं (for च पीडितः). D5 चापि प्र- (for पश्चाच्च). — c) K4 B1. 3. 5 D2 [अ]थ च (B3 स) (for युधि). B2. 4 आस(B4 विष)सादाथ पांचाल्यो; Dc1 Dn1 समासाद्य स पां°. — d) Ś K1-3 D1 समाश्रयत; S (except G1; G5 missing) सोपाश्र° (for व्यपाश्र°). D4. 5. 7. 8 स; T G3. 4 वै; M1. 2 तं (for च). Dc1 ध्वजे (for ध्वजम्). D3 संप्राप्याश्रयत ध्वजं.

55 D5. 6 om. 55 (for D5, cf. v. l. 54). — a) B Dc1 Dn1 S (G5 missing) नागम् (for मत्तम्). — b) D4 -मर्दनं; T G3. 4 -मर्दिना (for -मर्दितम्). B Dc1 Dn1 दृष्ट्वा राजञ्शरार्दितं. — c) M3-5 यौधाः (for शूराः). Ś2 K1. 2. 4 D1 दृष्ट्वा समाद्रवञ्शूराः. — d) Ś2 K1. 2. 4 D1 -पांडुमहा- (for पाण्डवतो). G1 M यौधाः (M3-5 शूराः) पांचालपांडवाः.

56 D6 om. 56ab (cf. v. l. 54). — b) D5 बृहत्क्षत्रश्च (for वृद्धक्ष°). K1 पौरुवः (sic) (for पौरवः). — d) T G2 M1. 2. 5 माळवश्च. Dn2 तु (for च). — After 56cd, K2 (marg.). 4 B Dc1 Dn D1. 5. 6 S (G5 missing) ins.:

1413* एते हाहाकृताः सर्वे प्रगृहीतशरासनाः ।
वीरं द्रौणायनिं वीराः सर्वतः पर्यवारयन् ।
ते विंशतिपदे यत्ता गुरुपुत्रममर्षणम् ।

[(L. 1) D6 एवं (for एते). D6 गृहीतस- (for प्रगृहीत-). G3 -शरार्दिताः. — (L. 2) D6 G1. 4 M1. 3-5 वीरा (for वीरं). D6 वीरं; S (except M2; G5 missing) शूरं (M3 °राः) (for वीराः). D1 सर्वतः समवाकिरन् (for the post. half). — (L. 3) K4 D1 -पदा (for -पदे). D6 ते विंशतिपदं गत्वा (for the prior half). T G3 अमर्षिणं.]

— f) S (G5 missing) आजघ्नुः (for अभ्यघ्नन्). D5 द्विजं; D6 भृशं (for समम्).

57 D5 om. 57ab. — a) Ś1 K4 B Dc1 Dn1 D2. 8 विंशत्या; D6 त्वरितस् (for विंशद्भिः). — b) D8 विद्युद्भिश् (for पञ्चभिश्). K4 Dn2 तु (Dn2 च) शितैः; B1-4 Dc1 तु स ताञ्; Dn1 तु सिताञ्; D4 चार्दितः; T चार्पितांञ्; G2 चानितांञ् (for चापि ताञ्). S (G5 missing) शरान् (for शरैः). B5 पंचभिस्त्वथ सायकान्; D6 तांश्चापि विशिखाञ्शरैः. — d) D7. 8 पंचविंशतिमाशुगान्.

58 a) K4 B Dc1 Dn1 तु शितैर्; T G1. 3. 4 M1-3. 5 चापि तं; G2 चैव तं (for च शितैर्). D6 ततस्तु सप्तभिर्बाणैः; M4 सप्तभिश्चापि सद्बाणैः. — b) Dn2 om. from आर्द up to शिला (in 59d). B1 आर्द्रवत्; D4. 8 T G1-4 M1. 2 अर्दयत् (for आर्द°). D6 पौरवो द्रौणिमार्दयत्. — c) T G1. 2 M माळवं. D6 एवैनं (for एकेन). — d) D5 षड्भिः पार्थं (by transp.); D6 शरैः षड्भिर्.

59 Dn2 om., up to शिला (cf. v. l. 58). — a) D6 एवं (for ततस्). — K4 om. 59c–60b. — c) D4 पृथक्त्वेन (for °क्चैव). D5 बाणैरेव महात्मानो. — d) D4. 7. 8 शिलीमुखैः (for शिलाशितैः).

युवराजस्तु विंशत्या द्रौणिं विव्याध पत्रिणाम् ।
पार्थश्च पुनरष्टाभिस्तथा सर्वे त्रिभिस्त्रिभिः ॥ ६०
ततोऽर्जुनं षड्भिरथाजघान
द्रौणायनिर्दशभिर्वासुदेवम् ।
भीमं दशार्धैर्युवराजं चतुर्भि-
र्द्वाभ्यां छित्त्वा कार्मुकं च ध्वजं च ।
पुनः पार्थं शरवर्षेण विद्ध्वा
द्रौणिर्घोरं सिंहनादं ननाद ॥ ६१
तस्यास्यतः सुनिशितान्पीतधारा-
न्द्रौणेः शरान्पृष्ठतश्चाग्रतश्च ।
धरा वियद्द्यौः प्रदिशो दिशश्च
छन्ना बाणैरभवन्घोररूपैः ॥ ६२
आसीनस्य स्वरथं तूग्रतेजाः
सुदर्शनस्येन्द्रकेतुप्रकाशौ ।
भुजौ शिरश्चेन्द्रसमानवीर्य-
स्त्रिभिः शरैर्युगपत्संचकर्त ॥ ६३
स पौरवं रथशक्त्या निहत्य
छित्त्वा रथं तिलशश्चापि बाणैः ।
छित्त्वास्य बाहू वरचन्दनाक्तौ
भल्लेन कायाच्छिर उच्चकर्त ॥ ६४

---

60 Ś2 K4 om. 60^{ab} (for K4, cf. v. l. 59). K3 damaged for 60^{ab}. — a) T G2–4 M1.2 युवराजं (for °राजस्). B Dc1 Dn D2.4-8 च (for तु). — b) S (G5 missing) पुनर् (for द्रौणिं). T G2 विव्याथ (for °ध). K1 D4.5 पत्रिणा; B Dc1 Dn D2.6 G1.3.4 M पत्रिभिः; G2 पंचभिः (for पत्रिणाम्). — For 60^{ab}, Ś1 D1 subst.:

1414* ततस्तानर्दयन्सर्वान्द्रौणिर्युगपदेव हि ।

— c) Ś2 पुनश्; K1 पार्थाश्; D6 भीमश्; T G2–4 पार्थं (for पार्थश्). — d) G2 पुनः (for तथा). T G2–4 सर्वांस् (for सर्वे). G1 M1.2 तथा सर्वे पृथक्पृथक्.

61 a) D6 भीमं (for ऽर्जुनं). D2 अथोजघान; D5 अथो महात्मा; D7.8 अभ्याजघान (for अथाज°). — b) Some MSS. द्रोणायनिर् (for द्रौणा°). D6 द्रोणायनिर्त्रिंशखै रुक्मपुंखैः. — c) Dn2 भीमं दशार्धं युवरावराजं; D6 कृष्णार्जुनौ चापि दशार्धसंख्ये. — After 42^{abc}, N (K5 missing) T1 ins.:

1415* द्वाभ्यां द्वाभ्यां मालवपौरवौ च
सूतं विद्ध्वा भीमसेनस्य षड्भिः ।

[(L. 1) Ś1 K3.4 मालवं; D4 °लवा (for °लव-). Ś1 K (K5 missing) D1 तु (for च). B Dc1 Dn1 D3.5 द्वाभ्यां द्वाभ्यां मालवं पौरवं च; Dn2 चतुर्भिर्द्वाभ्यां मालवं पौरवं तु. —(L. 2) K3.4 D6 सुतं (for सूतं).]

— e) D4 पार्थं च; D6 भीमं (for पार्थं). Ś1 भित्त्वा; Dn2 lacuna (for विद्ध्वा). — f) D3 चकार (for ननाद).

62 a) K4 B1–4 Dc1 Dn1 तान् (for सु-). B5 Dn2 D3–5 G1–4 M3–5 सुशितान्; D6 निशितान् (for सुनि°). Ś K1–3 D1 तस्यास्यतः शितधारान्समंताद्. — b) Ś1 K1.3 B1 Dn2 D6 M4.5 द्रौणिः (for द्रौणेः). D5.7.8 पार्श्वतश् (for चाग्र°). — c) K1 D1 धारा वियद्यौः (sic); T2 G1–4 M1.2 सर्वा वियद्भूः. M3–5 सर्वा दिशः प्रदिशो वै वियच्च. — d) K1 D4 छिन्ना (for छन्ना). K1 B1 D4–8 T2 G3 अभवद् (for °वन्).

63 a) K4 B Dc1 Dn1 T1 आसन्नस्य; D6 अथासीनः (for आसीनस्य). K1.2 D1.6 स्वरथे (D1 °थेर्); Dn2 स्वरथैः (for °थं). Dn2 om. from तूग्र up to छित्त्वा (in 64^{b}). K1.2 तूग्रतेजः; K4 B Dc1 Dn1 तीव्रतेजाः; D1.3 T1 उग्र° (for तूग्र°). Ś1 K3 आसीनस्य स्वरथांतेग्रतेजाः; T2 G1–4 M अथास्यतस्तस्य रथे स्थितस्य. — c) Ś2 K2 B1 D6 T G2–4 चंद्र- (for चेन्द्र-). D6 T G2–4 -कल्पं; M3–5 -कल्पस् (for -वीर्यस्). — d) D4.8 repeat त्रिभिः. B1.2 क्षुरैर्; B4 T G2–4 M1.2 क्षुद्रैर् (for शरैर्). D3 निश्चकर्त; T G2–4 चावकर्त (for संच°).

64 Dn2 om. up to छित्त्वा (cf. v. l. 63). K2 reads 64 on marg. — a) T2 G2–4 M1.2 शर- (for रथ-). Ś K1.3 D1 विभिद्य; D3.5.8 [अ]भिहत्य (for नि°). D6 ततस्तूर्णं पौरवं चापि राजन्. — b) D3 छिन्नो रथस् (for छित्त्वा रथं). B Dc1 Dn1 D2 T1 चास्य; D6 [ऽ]थास्य (for चापि). T2 G1–4 M रथं तथा तिलशश्चूर्णयित्वा (G1 M °शः संचकर्त). — c) K1 छित्त्वा चास्य; K4 B1.3.4 Dc1 Dn D2.4.5.7.8 G1.2 छित्त्वा च; D3 छित्त्वाथ; D6 चिच्छेद; T1 छित्वा*; G3 भित्त्वास्य (for छित्त्वा°). Dn2 वाहवर-; D4 बाहूदर- (for बाहू वर-). M3–5 -चंदनार्द्रौ (for °क्तौ). — d) D5 उच्चकर्त वीर; D6 च शिरश्चकर्त (for शिर उच्च°).

युवानमिन्दीवरदामवर्णं
　　चेदिप्रियं युवराजं प्रहस्य ।
बाणैस्त्वरावाञ्ज्वलिताग्निकल्पै-
　　र्विद्ध्वा प्रादान्मृत्यवे साश्वसूतम् ॥ ६५
तान्निहत्य रणे वीरो द्रोणपुत्रो युधां पतिः ।
दध्मौ प्रमुदितः शङ्खं बृहन्तमपराजितः ॥ ६६
ततः सर्वे च पाञ्चाला भीमसेनश्च पाण्डवः ।
धृष्टद्युम्नरथं भीतास्त्यक्त्वा संप्राद्रवन्दिशः ॥ ६७
तान्प्रभग्नांस्तथा द्रौणिः पृष्ठतो विकिरञ्शरैः ।
अभ्यवर्तत वेगेन कालवत्पाण्डुवाहिनीम् ॥ ६८
ते वध्यमानाः समरे द्रोणपुत्रेण क्षत्रियाः ।
द्रोणपुत्रं भयाद्राजन्दिक्षु सर्वासु मेनिरे ॥ ६९

C. 7. 9389
B. 7. 200. 131
K. 7. 201. 132

इति श्रीमहाभारते द्रोणपर्वणि एकसप्तत्यधिकशततमोऽध्यायः ॥ १७१ ॥

---

65 a) K1 -दानवर्णं (for -दाम°). D6 ततो युवानं वरहेमवर्णं. — b) K4 B Dc1 Dn D6 T1 चेदिप्रभुं (for °प्रियं). D4 पुरराजं (for युवराजं). D1 om. (hapl.) from प्रहस्य up to साश्वसूतम् (in 65^{d}). K3.4 B Dc1 Dn D3.6.7 T G1.3.4 M1–4 प्रसह्य; D2 प्रहृत्य; D4 (also as in text) नरेंद्रं; G2 प्रपश्य (for प्रहस्य). — c) K4 Dc1 Dn2 D2 प्रज्वलिताग्निकल्पैर्; B4 ज्वलदग्निक°; B5 ज्वलिताग्रकल्पैर्; D6 ज्वलदर्कवर्णैर्; T2 G2-4 ज्वलनाग्निकल्पैर्; M4 ज्वलितेंद्रकल्पैर् (for ज्वलिताग्नि°). — After 65, K4 B Dc1 Dn D1.5.6 T1 ins. a passage given in App. I (No. 24).

66 B4 om. 66. B1.3 Dc1 Dn T1 om. 66^{ab}. — a) K4 B2.5 S (T1 om.; G5 missing) तं (for तान्). D5 वीरान् (for वीरो). — b) B2.5 वरः; D6.8 प्रति (sic) (for पतिः). — c) Ś K1-3 D1.3 प्रमुखतः (for °दितः). — d) Ś K1-3 D1 नदंतम्; D4 वहंतम् (for बृहन्तम्). Dc1 Dn1 अपराजितं. Dn2 बृहंतं मम गर्जितैः; D6 बृहंतं द्रौणिराहवे.

67 a) Ś K1-3 D1 स (for च). K4 D5.7 T G1.2 M पंचाला (for पाञ्चाला). — b) D2.7 पांडवाः (for पाण्डवः). — For 67^{ab}, D6 subst.:

1416* पाञ्चालास्तु ततः सर्वे द्रोणपुत्रशरार्दिताः ।

— cd) K1.2 धृष्टद्युम्नं; D2 °द्युम्नो (for °द्युम्न-). Dn2 -रथे; D2 रणं (for -रथं). K4 B Dc1 Dn S (G5 missing) transp. भीताः and त्यक्त्वा. D6 धृष्टद्युम्नेन सहिता. D6 द्रुतं (for त्यक्त्वा). D3 च प्राद्रवन्; T2 G3.4 सर्वेद्रवन्; G2 सर्वाद्र° (for संप्राद्र°). D5 भयात् (for दिशः).

68 D6 om. 68–69. — a) Dn2 corrupt; G2 प्रभग्नांश्च; M1.2.5 तान्प्रभंजंस् (for °भग्नांस्). K4 B Dc1 Dn T G2–4 M3–5 ततो; D5 रणे; G1 M2 तदा (for तथा). D5 दृष्ट्वा (for द्रौणिः). — b) D3 विकरञ्; G4 व्यकि° (for विकि°). K4 B5 S (except T1; G5 missing) शरान् (for शरैः). — c) Ś1 K3 अभ्यद्रवत; D3 °वर्षत (for °वर्तत). — d) K3.4 B Dc1 Dn D1.2 T1 कालयन् (for °वत्). T2 G2–4 कालव(T2 G2 °य)त्परसैनिकान्.

69 D6 om. 69 (cf. v. l. 68). — b) K1.2 क्षत्रियः; B Dc1 Dn1 पार्थिवाः (for क्षत्रियाः). — c) K3.4 B5 Dn2 D7 T1 G1 M1.2.4 द्रोणपुत्र- (for °पुत्रं). — d) K3 D3 दिशः (for दिक्षु). B5 D1 G1 M1.2 भेजिरे (for मेनिरे). K4 Dn2 D7 T1 दिशः सर्वाश्च भेजिरे.

Colophon om. in D4; K5 G5 missing. — *Subparvan :* B1 नारायणास्त्रमोक्ष. — *Day of Droṇa's Generalship :* Ś2 पंचमे दिने; K1 पंचमे युद्धदिवसे; K2 पंचमे दिवसे. — *Adhy. name :* D6 अश्वत्थाम्नः पराक्रमः. — *Adhy. no.* (figures, words or both): Dn1 201; D3 94; T G2.3 195; G1 M1.2 194; G4 196; M3-5 193. — *Śloka no.:* Dc1 13; Dn1 113.

१७२

C. 7. 9390
B. 7. 201. 1
K. 7. 202. 1

संजय उवाच ।
तत्प्रभग्नं बलं दृष्ट्वा कुन्तीपुत्रो धनंजयः ।
न्यवारयदमेयात्मा द्रोणपुत्रवधेप्सया ॥ १
ततस्ते सैनिका राजन्नैव तत्रावतस्थिरे ।
संस्थाप्यमाना यत्नेन गोविन्देनार्जुनेन च ॥ २
एक एव तु बीभत्सुः सोमकावयवैः सह ।
मत्स्यैरन्यैश्च संधाय कौरवैः संन्यवर्तत ॥ ३
ततो द्रुतमतिक्रम्य सिंहलाङ्गूलकेतनम् ।
सव्यसाची महेष्वासमश्वत्थामानमब्रवीत् ॥ ४
या शक्तिर्यच्च ते वीर्यं यज्ज्ञानं यच्च पौरुषम् ।
धार्तराष्ट्रेषु या प्रीतिः प्रद्वेषोऽस्मासु यश्च ते ।
यच्च भूयोऽस्ति तेजस्तत्परमं मम दर्शय ॥ ५
स एव द्रोणहन्ता ते दर्पं भेत्स्यति पार्षतः ।
कालानलसमप्रख्यो द्विषतामन्तको युधि ।
समासादय पाञ्चाल्यं मां चापि सहकेशवम् ॥ ६
धृतराष्ट्र उवाच ।
आचार्यपुत्रो मानार्हो बलवांश्चापि संजय ।
प्रीतिर्धनंजये चास्य प्रियश्चापि स वासवेः ॥ ७

172

☞ This adhy. is missing in K5 G5 (cf. v. l. 7. 125. 14; 137. 9).

1 After the ref., D6 ins. :

1417* तान्दृष्ट्वा द्रवतः शूरान्बीभत्सुरपराजितः ।
मत्स्यैश्च सोमकैश्चैव सहितो**मभ्ययात् ।

— D6 om. 1-3. — [d]) D1 -पुत्रं (for -पुत्र-). B Dc1 Dn1 D3 द्रोणपुत्रं (Dn1 त्र-) जयेप्स(D3 °क्ष)या.

2 D6 om. 2 (cf. v. l. 1). — [b]) S (G5 missing) सर्वे (for नैव). — [c]) Dn2 संवार्यमाणा यत्नेन; D5. 7. 8 स्थाप्यमानाः प्रय°.

3 D6 om. 3 (cf. v. l. 1). — [a]) Ś2 B (except B5) Dc1 Dn1 D2 च; T G3. 4 हि (for तु). D5. 7 बिभत्सुः (sic). — [b]) D2. 4. 5. 7. 8 G1 M1. 2 सोमकैर्यवनैः सह; M3-5 °कान्मालवैः सह. — [d]) Ś2 K1. 2 B2-4 Dc1 Dn D1 पौरवैः; K4 D2 G1 M1. 2 कौरवान्; D3 कौंतेयः; D4. 5. 7. 8 कौरव्यान्. Ś1 K3 Dn1 G3. 4 स न्यवर्तत; Dn2 संन्यवर्तयत्; D5 संनिवर्तत.

4 [a]) K1 B1 D6 T G2-4 M3-5 अभिक्रम्य; D2. 4. 5. 7. 8 G1 M1. 2 अभिद्रुत्य (for अतिक्रम्य). — [c]) D3. 5. 6 महेष्वासो.

5 [a]) K4 वीर्यं ते (by transp.); B1. 3. 4 Dc1 Dn1 D1 विज्ञानं; B2. 5 D6 S (G5 missing) ते ज्ञा(T G2-4 स्था)नं. — [b]) B Dc1 Dn1 D1 S (G5 missing) यद्वीर्यं; D2 विज्ञानं; D6 om. (hapl.) (for यज्ज्ञानं). — [d]) B1. 3 Dc1 Dn1 विद्वेषो; D3 G2 यद्वेषो. Ś2 B1. 2 D2 G1. 2 M1-4 यच्च ते; D6 दृश्यते (for यश्च ते). K4 B5 द्वेषोस्मासु च यश्च (K4 °च्च) ते. — [e]) D2 om. च. D1 [ऽ]पि (for ऽस्ति). K3 D3 तत्तेजस् (by transp.); B1 Dc1 Dn1 D2. 4. 5. 7. 8 G1 M ते तेजस्; B2-5 T G3. 4 तेजस्ते. Ś2 यच्च तेजोस्ति भूयस्तत्; D6 यच्च भूयोस्त्रबलं**. — [f]) D2-5. 7. 8 तत्परं (for परमं). K1. 2 समदर्शय (for मम दर्शय). B Dc1 Dn1 D6 T G1-4 M1-3 तत्सर्वं मयि दर्शय; M4. 5 सर्वं मयि निदर्शय.

6 D6 om. 6[ab]. — [a]) D4 एवं; D5 एको (for एव). K1 द्रोणहर्ता; Dn2 द्रोणं हंता. S (G5 missing) एष द्रोणस्य हंता ते. — [b]) B Dc1 Dn1 D2. 5. 7. 8 S (G5 missing) छेत्स्यति; D4 प्राप्स्यति (for भेत्स्यति). — [c]) K4 B1. 2. 4. 5 Dc1 Dn D2. 3. 6 S (G5 missing) -प्रख्यं; B3 -प्रेक्ष्यं; D7. 8 -प्रख्यौ. — [d]) B Dc1 Dn1 S (G5 missing) अंतकं युधि; Dn2 D3. 6 °कोपमं; D7. 8 °कौ युधि (for °को युधि). — [e]) D6 यत्तस्त्वं (for पाञ्चाल्यं). — [f]) Dn1 मां वा; D5 मम (for मां च). D6 प्रायेणैवाद्य केशवं. — After 6, K1 B Dc1 Dn D5. 6 ins. :

1418* दर्पं नाशयितास्म्यद्य तवोद्वृत्तस्य संयुगे ।

7 [a]) K3 lacuna. Ś1 द्रोणपुत्रो द्विजवरो; Ś2 अश्वत्थामा गुरोः पुत्रो. — [b]) Dn2 पांडवः (for संजय). — [d]) D7. 8 T G1. 3. 4 M चास्य; G2 चैव (for चापि). K4 B1. 2. 4. 5 D (except D1) S (G5 missing) महात्मनः (for स वासवेः). B3 प्रियश्च परमात्मनः.

8 [a]) D2. 6 अभूत- (for न भूत-). K1 भूतं पूर्वं;

न भूतपूर्वं बीभत्सोर्वाक्यं परुषमीदृशम् ।
अथ कस्मात्स कौन्तेयः सखायं रूक्षमब्रवीत् ॥ ८
संजय उवाच ।
युवराजे हते चैव वृद्धक्षत्रे च पौरवे ।
इष्वस्त्रविधिसंपन्ने मालवे च सुदर्शने ॥ ९
धृष्टद्युम्ने सात्यकौ च भीमे चापि पराजिते ।
युधिष्ठिरस्य तैर्वाक्यैर्मर्मण्यपि च घट्टिते ॥ १०
अन्तर्भेदे च संजाते दुःखं संस्मृत्य च प्रभो ।
अभूतपूर्वो बीभत्सोर्दुःखान्मन्युरजायत ॥ ११
तस्मादनर्हमश्लीलमप्रियं द्रौणिमुक्तवान् ।
मान्यमाचार्यतनयं रूक्षं कापुरुषो यथा ॥ १२
एवमुक्तः श्वसन्क्रोधान्महेष्वासतमो नृप ।
पार्थेन परुषं वाक्यं सर्वमर्मघ्नया गिरा ।
द्रौणिश्चुकोप पार्थाय कृष्णाय च विशेषतः ॥ १३
स तु यत्तो रथे स्थित्वा वार्युपस्पृश्य वीर्यवान् ।
देवैरपि सुदुर्धर्षमस्त्रमाग्नेयमाददे ॥ १४
दृश्यादृश्यानरिगणानुद्दिश्याचार्यनन्दनः ।
सोऽभिमन्त्र्य शरं दीप्तं विधूममिव पावकम् ।
सर्वतः क्रोधमाविश्य चिक्षेप परवीरहा ॥ १५
ततस्तुमुलमाकाशे शरवर्षमजायत ।

C. 7. 9408
B. 7. 201. 18
K. 7. 202. 18

D4 भूतपूर्वं-. Ś1 कथं युद्धं समभवद्; Ś2 तेनोक्तं गर्हितं तस्य; K3 lacuna; K4 नोक्तपूर्वं तु पार्थेन; D1 अनोक्तपूर्वं पार्थेन; S (G5 missing) अभूतपूर्वं बीभत्सुर् (G1 M °त्सोर्). — b) Ś1 अतिकारणमीदृशं; Ś2 पार्थेन कथमी°. — c) Dc1 Dn1 D7.8 च (for स). Ś2 अकस्मात्स च कौंतेयः; D4 कथमस्मात्सकौंतेय (sic). — d) Ś1 हतवानपि; Ś2 इदमुक्तवान्; K1 रूक्ष्यमब्रवीत्; K3 lacuna; B Dc1 Dn1 D6 रूक्ष(B3 व्यंग)मुक्तवान्; D1 वाक्यमब्रवीत्; D2 रौक्ष्यम°; D3 परुषम° (hypermetric); S (G5 missing) क्रूरमुक्तवान् (for रूक्षमब्रवीत्).

9 a) Dn2 D3.6 T G1.3.4 M राजन्; G2 चापि (for चैव). — b) K1 B1.3.4 D4 वृद्धक्षेत्रे; D5 बृहत्क्षत्रे (for वृद्धक्षत्रे). — c) D4.5 अत्यस्त्र- (for इष्वस्त्र-). S (G5 missing) -बल- (for -विधि-). D6 -संपाते (for -संपन्ने). — d) D6 मालव्ये; some S MSS. माळवे. G1 M1.2 तु (for च).

10 a) D4 च सात्यके; D5 सात्वते च; D6 सात्यके च (for सात्यकौ च). — b) K1 यमे चापि; D6 भीमसेने (for भीमे चापि). Dn2 निर्जिते युधि भारत. — c) Ś2 तद् (for तैर्). — d) B5 वि- (for च). B4 खंडिते; D1 घट्टते; D6 अर्दिते; D8 भिद्यते; T G2-4 घट्टितः; G1 M घट्टितैः. D5 मर्मण्यभिहते तदा.

11 a) Ś K1-3 D1 अंतर्भूते; D2 अवभेदे (for अन्तर्भेदे). D2-8 संप्राप्ते (for संजाते). — b) Ś2 दुःखे. D4 संस्पृश्य (for संस्मृत्य). K1 विभो. — c) K1.2 D1-6 S (G5 missing) अभूतपूर्वं. — d) Dc1 Dn1 दुःख-; S (G5 missing) अति- (for दुःखान्). D8 मृत्युर् (for मन्युर्).

12 a) Ś K1-3 D1 अक्लीबम्; D2 अश्लिष्टम्; S (G5 missing) अशिवम् (for अश्लीलम्). — b) Dn2 अब्रवीत् (for उक्तवान्). — d) S (G5 missing) क्रूरं (for रूक्षं). K1.2.4 T G3.4 कापुरुषं. D6 रूक्षं परुषया गिरा.

13 a) B1-3 Dc1 Dn1 D2 च स; B4.5 D7.8 तु स; D4.5 तु सं- (for श्वसन्). D6 द्रोणपुत्रस्तु संक्रोधान्. — b) D6 महेश्वरसमो नृपु; S (G5 missing) °ष्वासोसमो नृपु. — D6 om. 13cd. — d) B Dc1 Dn1 -मर्मभिदा; D1 °च्छिदा; G2 °ज्ञया (for °घ्नया). — e) D4.5 च कोपं (for चुकोप). D6 चुकोप पार्थाय भृशं; T G1.2.4 M चुकोप द्रौणिः पार्थाय. — f) K4 विशां पते (for विशेषतः). D6 भीमाय च विशां पते; S (G5 missing) स कृष्णा(G2 पुत्रा)य विशां पते.

14 a) K4 स तु युक्तो; D2.4.5.7.8 स च (D2 तु) यत्नाद्; T G1.2.4 M1.2 संयत्तो द्वैः; G3 संयुक्तोश्वैः; M3-5 स यत्तो वै (for स तु यत्तो). Ś K1.2.4 B1.3 Dc1 Dn1 रणे (for रथे). D6 संयत्तो द्वैरथे तिष्ठन्. — d) Ś1 K3.4 D1 आदधे. D2.4.5 अस्त्रं ब्रह्म(D4 भीम)शिरो ददे (D2 °धे); D6 अस्त्रं ब्रह्मशिरस्ततः.

15 a) D6 आददेरिगणान्संख्ये. — b) Ś2 आदिश्य; D6 उद्यम्य (for उद्दिश्य). — d) D1 विधूम इव पावकः. — e) G3.4 M3.5 क्रोशम् (for क्रोधम्). S (G5 missing) उद्दिश्य (for आविश्य).

16 a) K1 ततस्तु (hypermetric) (for ततस्). D4-8 तुमलम्. — b) S (G5 missing) विनेदुरभि(M1.2 °ति)संगताः (= the post. half of line 4 in 1419*). — After 16ab, N (K5 missing) ins.:

C. 7. 9410
B. 7. 201. 20
K. 7. 202. 20

ववुश्च शिशिरा वाताः सूर्यो नैव तताप च ॥ १६
चुक्रुशुर्दानवाश्चापि दिक्षु सर्वासु भैरवम् ।
रुधिरं चापि वर्षन्तो विनेदुस्तोयदाम्बरे ॥ १७
पक्षिणः पशवो गावो मुनयश्चापि सुव्रताः ।
परमं प्रयतात्मानो न शान्तिमुपलेभिरे ॥ १८
भ्रान्तसर्वमहाभूतमावर्जितदिवाकरम् ।
त्रैलोक्यमभिसंतप्तं ज्वराविष्टमिवातुरम् ॥ १९
शरतेजोऽभिसंतप्ता नागा भूमिशयास्तथा ।
निःश्वसन्तः समुत्पेतुस्तेजो घोरं मुमुक्षवः ॥ २०
जलजानि च सत्त्वानि दह्यमानानि भारत ।
न शान्तिमुपजग्मुर्हि तप्यमानैर्जलाशयैः ॥ २१
दिशः खं प्रदिशश्चैव भुवं च शरवृष्टयः ।
उच्चावचा निपेतुर्वै गरुडानिलरंहसः ॥ २२
तैः शरैर्द्रोणपुत्रस्य वज्रवेगसमाहितैः ।
प्रदग्धाः शत्रवः पेतुरग्निदग्धा इव द्रुमाः ॥ २३
दह्यमाना महानागाः पेतुरुर्व्यां समन्ततः ।

1419* पावकार्चिः परीतं तत्पार्थमेवाभिपुप्लुवे ।
उल्काश्च गगनात्पेतुर्दिशश्च न चकाशिरे ।
तमश्च सहसा रौद्रं चमूमवततार ताम् ।
रक्षांसि च पिशाचाश्च विनेदुरभिसंगताः ।

[(L. 1) D2 पतंगार्चिः (for पावका°). Ś2 तं (for तत्). Dn2 D1 पावकोर्भिः परीतस्तु (for the prior half). B5 D6 [अ]भिदुद्रुवे (for °पुप्लुवे). — (L. 2) K2 D1 न दिशश्च (by transp.). Ś K3 न च (by transp.). D3 प्रकाशिरे. — (L. 3) Dc1 Dn1 D4 ततश् (for तमश्). D7 om. from द्रं up to सर्वा (in 17^b). D2.4–6 तीव्रं (for रौद्रं). Ś K1–3 D1 अवततान; D3 °ततापं (for °ततार). Dn2 चमूमवसमर्दतां; D6 चमूमुपगतं च ह (for the post. half). — (L. 4) B4 विरेजुर् (for विनेदुर्). Ś K (K5 missing) D1.5 अति- (for अभि-). Dc1 Dn1 -संहताः (for -संगताः).]

— D4 om. 16^c. — ^{c}) K2–4 B2.5 Dc1 Dn1 D2.3 [अ]शिशिरा; B1.3.4 Dc1 Dn1 D5.6 [अ]प्यशिवा; S (G5 missing) परुषा (for शिशिरा). — ^{d}) D3 G1 नाति-; T G2.3 M नापि; G4 नाभि- (for नैव). D6 ह (for च).

17 D7 om. up to सर्वा (cf. v. l. 1419*). — ^{a}) Dn2 वायसाश्; D4.5 देवताश् (for दानवाश्). D3 तत्र (for चापि). B Dc1 Dn1 D1.6 G1 M वायसा- (D6 G1 M दानवा)श्चापि चाक्रंदन् (G1 °दुर्); T G2–4 दानवैश्चापि चाक्रंदे. — ^{b}) B1 पार्थिव; S (G5 missing) भारत (for भैरवम्). D5 रुक्षाणि वचनानि च. — ^{c}) Ś2 K1.2 Dn2 D1.8 चाभि- (for चापि). T G1–4 M1.2 ववर्ष रुधिरं चेंद्रो; M3–5 रुधिरं च ववर्षेंद्रो. — ^{d}) D4.5.7.8 ते तदा (for तोयदा). K2.4 Dn2 D2.8 T दिवि (for [अ]म्बरे).

18 ^{a}) Dn2 om. गावो. D8 पशवः पक्षिणो गावो. — ^{b}) K4 B1.3.5 Dn2 विनेदुश् (for मुनयश्). Ś2 K1.2 D1 M3–5 सुव्रत. — ^{c}) B4 Dc1 Dn1 G3.4 परम-. D6 ऋषयः परमात्मानो; G1 M1.2 परमप्रियमापन्ना; M3–5 परप्रियहितात्मानो.

19 ^{a}) Dn D3.6 भ्रांतं (for भ्रान्त-). Dn2 D6 सर्वं; D4 -सत्त्व-; D5.7.8 -सत्त्वं (for -सर्व-). — ^{b}) K3.4 B2.4.5 Dn2 D2.8 T G2–4 आवर्तित- (for °र्जित-). — After 19^{ab}, D3 reads 21^{ab} for the first time, repeating it in its proper place. — ^{c}) D3 अपि (for अभि-). D6 त्रैलोक्यमभवत्तात; S (G5 missing) °मभितस्तापं (G1 M1.2 °त; G4 M4 °प-). — ^{d}) Ś K1.2 D1 ज्वराविद्धम्; D4 °मिष्टम् (for °विष्टम्). K4 B Dc1 Dn [अ]भवत् (for [आ]तुरम्).

20 ^{a}) Ś2 शरतेजोभिः; K3 B Dc1 Dn S (G5 missing) अस्त्रतेजोभि- (for शर°). D2.4.5.7.8 -तप्तांगा (D4 °गो) (for -संतप्ता). — ^{b}) D2 तदा (for तथा). — ^{c}) Some MSS. निश्वसंतः. — ^{d}) G1.3.4 M -राशिं (for घोरं).

21 D3 reads 21^{ab} for the first time after 19^{ab}. — ^{a}) D4.5 सु-; G1 M1.2 [अ]पि (for च). D3 (first time) त्रैलोक्ये सर्वभूतानि. — ^{b}) D6 सर्वशः (for भारत). — ^{c}) S (G5 missing) च (for हि). — ^{d}) D4 चेष्टमानैर् (for तप्य°). T G1.3.4 M4 तप्यमाने जलाशये.

22 G1 M om. 22^a–24^b. — ^{a}) D2 च (for खं). B Dc1 Dn D6 T G2–4 दिग्भ्यः प्रदिग्भ्यः खाद्भूमेर्. — ^{b}) K4 भुवश्च; B Dc1 Dn1 सर्वतः; Dn2 स्वयं च; D6 दिवं च; T G2–4 दिवश्च (for भुवं च). D2 शरवृष्टिभिः. — ^{c}) T G2–4 च संपेतुर् (for निपेतुर्वै). Dc1 Dn1 हि; D8 च (for वै). — ^{d}) G2 -वेगिनः (for -रंहसः).

23 G1 M om. 23 (cf. v. l. 22). — ^{a}) Ś2 K1

नदन्तो भैरवान्नादाञ्जलदोपमनिस्वनान् ॥ २४
अपरे प्रद्रुतास्तत्र दह्यमाना महागजाः ।
त्रेसुस्तथापरे घोरे वने दावाग्निसंवृताः ॥ २५
द्रुमाणां शिखराणीव दावदग्धानि मारिष ।
अश्ववृन्दान्यदृश्यन्त रथवृन्दानि चाभिभो ।
अपतन्त रथौघाश्च तत्र तत्र सहस्रशः ॥ २६
तत्सैन्यं भगवानग्निर्ददाह युधि भारत ।
युगान्ते सर्वभूतानि संवर्तक इवानलः ॥ २७

दृष्ट्वा तु पाण्डवीं सेनां दह्यमानां महाहवे ।
प्रहृष्टास्तावका राजन्सिंहनादान्विनेदिरे ॥ २८
ततस्तूर्यसहस्राणि नानालिङ्गानि भारत ।
तूर्णमाजघ्निरे हृष्टास्तावका जितकाशिनः ॥ २९
कृत्स्ना ह्यक्षौहिणी राजन्सव्यसाची च पाण्डवः ।
तमसा संवृते लोके नादृश्यत महाहवे ॥ ३०
नैव नस्तादृशं राजन्दृष्टपूर्वं न च श्रुतम् ।
यादृशं द्रोणपुत्रेण सृष्टमस्त्रममर्षिणा ॥ ३१

C. 7. 9426
B. 7. 201. 36
K. 7. 202. 35

ते (for तैः). — b) K3 D2.3.5 -वेगैः (for -वेग-). Ś2 वज्रवेगसमुत्थितैः; K4 B Dc1 Dn T G2-4 °वेगैः समाहताः (B5 °हिताः); D6 वज्रेणेव समाहताः. — c) B Dc1 Dn1 रिपवः; T G2-4 शात्रवाः (for शत्रवः). — d) Ś2 K2.4 D1 द्रुमा इव (by transp.). — After 23, D6 reads 31 followed by:

1420* कृष्णार्जुनौ हतावद्य द्रोणपुत्रस्य मायया ।
इति स्म सर्वे यो[? °वैयो]धानां मतमासीत्तदानघ ।

24 G1 M om. 24[ab] (cf. v. l. 22). D6 om. 24–28. — a) D3 तथा (for महा-). — c) T G1-4 M1.2 रुवंतो (for नदन्तो). T G2.3 भैरवं नादं. — d) Some MSS. -निःस्वनान्; B Dc1 Dn1 M3-5 -नि(B1.4 Dc1 Dn1 M3-5 -निः)स्वनाः.

25 D6 om. 25 (cf. v. l. 24). — a) D2 प्रद्रुतास् (for प्रद्रु°). B2-4 Dc1 Dn1 D1 नागा (for तत्र). — b) B2-4 Dc1 Dn1 D1 भयत्रस्ता विशां पते. — c) K4 B2-5 Dc1 Dn1 D1.2 त्रेसुर्दिशो यथापूर्वं (B5 यथा घोरे); B1 D7.8 श्रेमुस्त्रस्ता यथा घोरे; Dn2 D4.5 पेतु(Dn2 त्रेसु)स्त्रस्ता यथा घोरा; D3 त्रेसुस्त्रस्ता महाघोरे; T G2-4 पेतुस्तत्र महारण्ये; G1 M श्रेमुस्तत्र यथारण्ये. — d) S (G5 missing) नागा (for वने).

26 D6 om. 26 (cf. v. l. 24). Ś2 partly damaged in 26[a]. — c) D7.8 दृश्यंते (for [अ]दृश्यन्त). — d) K1.4 D1 चाविभो; B1.2.5 च प्रभो; B3.4 भारत; Dc1 Dn1 मारिष; Dn2 D1.3 वा विभो; D2.7.8 चाभिभोः (for चाभिभो). — e) D4.5 T G2-4 आपतंति (D4.5 °त). D2.4.5.7.8 S (G5 missing) नरौघाश्च.

27 D6 om. 27 (cf. v. l. 24). — a) D4 सर्वं (for सैन्यं). Dn2 दीर्घा (sic); D2.4.5.7.8 वह्निर् (for अग्निर्). B Dc1 Dn1 S (G5 missing) तत्सैन्यं युधि (B Dc1 Dn1 भय-) संविग्नं. — d) Ś1 K3 सांवर्तक; G3.4 संवर्ताग्निर् (for संवर्तक).

28 D6 om. 28 (cf. v. l. 24). D3 om. 28–30. G2 om. (hapl.) 28[c]–30[d]. K4 om. (hapl.) 28[d]–31[a]. — d) B1 सिंहनादं; D5 दह्यमानान्. Dn2 विनेस्वरे (sic); D7.8 वितेनिरे.

29 K4 D3 G2 om. 29 (cf. v. l. 28). — ab) T2 (before corr.) G1.3.4 M ततस्तूर्यनिनादोभूज्नानावादित्रमिश्रितः. — d) Dn1 जयकाशिनः. — After 29, D6 ins.:

1421* हाहाकारे ततः सैन्ये पाण्डवेयेषु भारत ।
रथसंघाश्च दह्यन्त हयानां प्रयुतानि च ।
तथा हयानां वृन्दानि पत्तयश्चाप्यनल्पकाः ।
गुरुपुत्रास्त्रवृर्ध्यंत[? ऊर्ध्वं]मेकज्वालमभूद्बलम् ।
वस्त्रैराभरणैश्छन्नैः केतुभिश्चोद्धतानलैः । [5]
धावमानैश्च पुरुषैर्देहबद्धैरिवाग्निभिः ।
नादह्यमानः पाण्डूनां कश्चित्सैन्ये व्यदृश्यत ।
उदीर्णं द्रोणपुत्रं च दृष्ट्वा पार्थः परंतपः ।
गाण्डीवं ज्यां च बाणांश्च सोऽनुमन्त्र्य महाबलः ।
ससर्ज प्र[? जांप्र]तिमं दिव्यमस्त्रं ब्राह्ममतिस्वरम् । [10]

30 K4 D3 G2 om. 30 (cf. v. l. 28). D6 om. 30. — a) T G1.3.4 M1.2.4 ह्यक्षोहिणी. — b) Ś1 धनंजयः (for च पाण्डवः). — d) B D1.2 S (G2 om.; G5 missing) नादृश्यंत; D4 दृश्यंत स.

31 K4 om. 31[a] (cf. v. l. 28). D6 reads 31 followed by 1420* after 23. — a) D5 न च (for नैव). D6 युद्धं (for राजन्). — d) D6 सृजतास्त्रम् सृष्टम°). D4.5 अमर्षणं. D7.8 कृतं हि कदनं महत्; M3-5 सृष्टेस्त्रे चाल्यमर्षिणा.

32 D6 om. 32[ab]. — b) K1.2 उदीरयेत्; K4 B3 Dc1 Dn1 D1-4.7.8 T G3.4 M5 (*sup. lin.*) उदीरयत्;

C. 7. 9426
B. 7. 201. 36
K. 7. 202. 36

अर्जुनस्तु महाराज ब्राह्ममस्त्रमुदैरयत् ।
सर्वास्त्रप्रतिघाताय विहितं पद्मयोनिना ॥ ३२
ततो मुहूर्तादिव तत्तमो व्युपशशाम ह ।
प्रववौ चानिलः शीतो दिशश्च विमलाभवन् ॥ ३३
तत्राद्भुतमपश्याम कृत्स्नामक्षौहिणीं हताम् ।
अनभिज्ञेयरूपां च प्रदग्धामस्त्रमायया ॥ ३४
ततो वीरौ महेष्वासौ विमुक्तौ केशवार्जुनौ ।
सहितौ संप्रदृश्येतां नभसीव तमोनुदौ ॥ ३५

सपताकध्वजहयः सानुकर्षवरायुधः ।
प्रबभौ स रथो मुक्तस्तावकानां भयंकरः ॥ ३६
ततः किलकिलाशब्दः शङ्खभेरीरवैः सह ।
पाण्डवानां प्रहृष्टानां क्षणेन समजायत ॥ ३७
हताविति तयोरासीत्सेनयोरुभयोर्मतिः ।
तरसाभ्यागतौ दृष्ट्वा विमुक्तौ केशवार्जुनौ ॥ ३८
तावक्षतौ प्रमुदितौ दध्मतुर्वारिजोत्तमौ ।
दृष्ट्वा प्रमुदितान्पार्थांस्त्वदीया व्यथिताभवन् ॥ ३९

D5 G1.2 M1.2.4 उदीरयन्; M5 (orig.) उदैरयन्. — c) B Dc1 Dn1 D2.6 S (G5 missing) -प्रतिघातार्थं; Dn2 (also as in text) -विघाताय (submetric). — d) K2 विदितं (for विहितं). D2.6 ब्रह्म- (for पद्म-).

33 a) D4.7.8 अपि तत्; D5 तत्सर्वं (for इव तत). D6 ततस्तु तत्तमो राजन्. — b) D6 क्षणाद्; G1 M तेजो (for तमो). Dn1 D2-4.7.8 [ऽ]भ्युपशशाम; T G2-4 [ऽ]प्युप° (for व्युप°). D5 क्षणेनाभ्युपशाम ह (sic). — c) Ś K1-3 D1.3 आववौ (for प्र°). D3 शांतो (for शीतो). — d) Ś1 K3 B1-4 Dc1 Dn D2-5.7.8 बभुः; D6 शुभाः (for [अ]भवन्).

34 a) G1 M1.2 ततो (for तत्र). Dc1 Dn1 D4-8 अपश्यामः. — b) G3.4 M1.2 अक्षोहिणीं. D2.4.5.7.8 इमां; S (G5 missing) मृधे (for हताम्). — c) Ś K1.3.4 D1 -ज्ञात- (for -ज्ञेय-). Ś1 K3.4 D2 -रूपं. Dn2 द्रोणपुत्रेण सहसा. — d) D2.4.5.7.8 चास्त्र- (for अस्त्र-). B Dc1 Dn S (G5 missing) -तेजसा (for -मायया).

35 a) D6 तौ च मुक्तौ (for ततो वीरौ). — b) D6 सहितौ (for विमुक्तौ). — c) D2.4-8 समरे (for सहितौ). Ś K1-3 Dn2 D1.3 समदृश्येतां; K4 B1-3.5 Dc1 Dn1 D2.4-8 प्रत्यदृश्ये(Dc1 Dn1 °युध्ये)तां; B4 तत्र दृ° (for संप्रदृ°). — d) Ś K1.2 D1.4.7.8 तमसीव (D4 °सा च) (for नभ°). — After 35, Dn2 D2.4-8 ins. :

1422* ततो गाण्डीवधन्वा च केशवश्चाक्षतावुभौ ।

36 a) D2.4.6-8 -हयौ; T G3.4 M3-5 -रथः; M1 -वरः (for -हयः). Dn2 सपताकाध्वजहयः; G1 M2 °काध्वजवरः. — b) G1 M1.2 सानुकर्षा. D4.6-8 -वरायुधौ; G3.4 -परायुधः (for -वरा°). — c) Ś K (K5 missing) B1-3.5 D1.5 युक्तस् (for मुक्तस्). D2.4.6-8 विमुक्तौ शरसंपाताद्; G2 प्रबभौ स रथासक्तस्. — d) D2.4.6-8 दृष्ट्वा (D7.8 तदा) शत्रुभयंकरौ.

37 a) D2.4.6-8 तूर्णं (for ततः). S (G5 missing) किलिकिलाशब्दः. — b) B Dc1 Dn -स्वनैः सह; D2.4.6-8 -महाध्वनिः (D4 °नैः); D3 S (G5 missing) -विमिश्रितः; D5 -महास्वनैः (for -रवैः सह). — D3 om. 37c-38b. — After 37, D2.4-6 ins. :

1423* पाण्डवान्मुदितान्दृष्ट्वा सर्वानेव स्वसैनिकान् ।
दुर्योधनपुरोगास्तु कौरव्या व्यथिताभवन् ।
इत्थं द्रौणिमहेष्वासं पार्थमप्रतिमं रणे ।
युद्धायोदीर्णमनसमप्रधृष्यं सुरैरपि ।
आवृण्वानं दिशः सर्वा बाणजालैः समन्ततः । [5]
दृष्ट्वा गाण्डीवनिर्मुक्तैः शरैराशीविषोपमैः ।
आदित्यमिव दुष्प्रेक्ष्यं दहन्तमहितान्रणे ।

[(L. 1) D2 पार्षतं; D4 पार्षतश्च (hypermetric); D6 पार्थांस्तु (for पाण्डवान्). D2 मुदितं. D2 एतांश्च (for एव स्व-). D6 स- (for स्व-). — (L. 2) D4.5 -पुरोगांश्च. D2 कौरवा. D4.5 कौरव्यान्व्यथितान्र(D5 °ता र)णे (for the post. half). — D5 om. lines 3-4. — (L. 3) D4 इच्छे (for इत्थं). D2.4 -महेष्वासः. D4 पार्थिवप्रतिमं. — (L. 4) D4 -मनसाम् (for °सम्). — (L. 5) D2 आवृण्वंत; D4 °ण्वानां. — (L. 7) D2 दह्यंतम्.]

38 D3 om. 38ab (cf. v. l. 37). D2.4.6 om. 38-41. — a) B Dc1 Dn1 D5 ह (B1.2.5 D5 हि) तत्रासीत्; S (G5 missing) च तत्रा° (for तयोरा°). — b) Dn1 अपि (for मतिः). — c) D1 उरुसा (for तरसा). B Dc1 Dn1 तम(B2-5 तेज)सा संवृतौ दृष्ट्वा; D5 तेजसा च धृतौ दृष्ट्वा; S (G5 missing) तेजसा ह्य(G1.3 M1.2 °साभ्य)धिकौ दृष्ट्वा. — d) K4 B Dc1 Dn D5 S (G5 missing) सहितौ; D3 विश्रांतौ (for विमुक्तौ).

39 D2.4.6 om. 39 (cf. v. l. 38). — b) Dn2

विमुक्तौ च महात्मानौ दृष्ट्वा द्रौणिः सुदुःखितः ।
मुहूर्तं चिन्तयामास किं त्वेतदिति मारिष ॥ ४०
चिन्तयित्वा तु राजेन्द्र ध्यानशोकपरायणः ।
निःश्वसन्दीर्घमुष्णं च विमनाश्चाभवत्तदा ॥ ४१
ततो द्रौणिर्धनुर्न्यस्य रथात्प्रस्कन्द्य वेगितः ।
धिग्धिक्सर्वमिदं मिथ्येत्युक्त्वा संप्राद्रवद्रणात् ॥ ४२
ततः स्निग्धाम्बुदाभासं वेदव्यासमकल्मषम् ।
आवासं च सरस्वत्याः स वै व्यासं ददर्श ह ॥ ४३
तं द्रौणिरग्रतो दृष्ट्वा स्थितं कुरुकुलोद्वह ।
सन्नकण्ठोऽब्रवीद्वाक्यमभिवाद्य सुदीनवत् ॥ ४४
भो भो माया यदृच्छा वा न विद्मः किमिदं भवेत् ।
अस्त्रं त्विदं कथं मिथ्या मम कश्च व्यतिक्रमः ॥ ४५
अधरोत्तरमेतद्वा लोकानां वा पराभवः ।
यदिमौ जीवतः कृष्णौ कालो हि दुरतिक्रमः ॥ ४६
नासुरामरगन्धर्वा न पिशाचा न राक्षसाः ।
न सर्पयक्षपतगा न मनुष्याः कथंचन ॥ ४७

C. 7. 9442
B. 7. 201. 52
K. 7. 202. 51

---

corrupt; D3 दध्मतौ (for दध्मतुर्). D7.8 वारिजौ तदा (for °जोत्तमौ). —^{c}) T G2-4 M1-3.5 च (for प्र-). Dn2 दृष्ट्वा प्रमुदिताः पार्थास्. —^{d}) Dn2 D3 भृशं; D5 तथा (for [अ]भवन्).

40 D2.4.6 om. 40 (cf. v. l. 38). —^{b}) D7.8 द्रौणिर्दृष्ट्वा (by transp.). —^{d}) B Dc1 Dn1 D7.8 एतद्; T G3.4 M5 न्वेतद् (for त्वेतद्).

41 D2.4.6 om. 41 (cf. v. l. 38). —^{a}) Ś K1-3 B1.5 Dc1 Dn1 D7.8 च (for तु). —^{b}) K1.2 D1 ध्यानालोक-; D3 ध्यायञ्शोक-; M4.5 (*sup. lin.*) ध्यानावेश- (for ध्यानशोक-). —^{c}) Some MSS. निश्वसन्; Dc1 Dn1 निश्वस्य. —^{d}) B1-3 Dc1 Dn1 दुःखार्तश्च (for विमनाश्च). Dn2 D5 T ततः (for तदा). B5 विमनाश्चाभ्यवर्तत. — After 41, S (G5 missing) ins. an addl. colophon [Adhy. no.: T G2.3 196; G1 M1.2 195; G4 197; M3-5 194].

42 Before 42, S (G5 missing) ins. संजय उवाच. D2 reads 42 twice (42^{ab} and 42^{cd} transposed second time). D4.5 transp. 42^{ab} and 42^{cd}. D7.8 repeat 42^{ab} after 42^{cd}. —^{a}) D2 (second time).4.5.7.8 (last two second time) अश्वत्थामा (for ततो द्रौणिर्). B Dc1 Dn1 D2 (both times).4.5.7.8 (last two second time) S (G5 missing) त्यक्त्वा (for न्यस्य). —^{b}) D5.7.8 (last two first time) वेगतः. D2 (second time).4.7.8 (last two second time) संप्राद्रवत दुर्मनाः. —K2 om. 42^{cd}. —^{c}) D4.5 धिग्धिक्कथम्; D7 धिग्धिकिम्; M3-5 धिग्धिग्बलम् (for °क्सर्वम्). D8 सत्पौरुषं (for सर्वमिदं). D2 (second time) दग्धं कृत्स्नमिदं मिथ्या; D3 धिग्धिगस्त्रं च मिथ्येति. —^{d}) D2 (second time).3-5 भयात् (for रणात्).

43 ^{a}) Dn2 स्निग्धांबुदाकारं; D2.4-8 स्निग्धांजन(D2.6 °बर)श्यामं. —^{b}) Ś1.2 (by corr.) K1.3 D6 वेदाभासम्; Ś2 K2 D1 वेदाभ्यासम्; K4 B Dc1 Dn D3 वेदा(Dn2 °द)वासम्; D7 व्येदव्यासम् (sic) (for वेद°). —^{cd}) Ś K (K5 missing) Dn2 D1.3 वेदव्यासं (for आवासं च) and वासं (for स वै). B Dc1 Dn1 D2.4-8 व्यासं द(D7.8 गच्छन्द)दर्श पुरतः साक्षाद्धर्ममिव (B1-3 Dc1 Dn1 °मं व्यव-; D4.5.7.8 °मंसुप-) स्थितं.

44 ^{a}) D2.4-8 व्यासं दृष्ट्वा ततो द्रौणिः. —^{b}) K4 B1.5 Dn2 D1.6 G1.2 M -कुलोद्वहं. —^{c}) B1 (marg.) अश्रुकंठो; B5 समुत्कंठो; T G2-4 M बाष्पकंठो (for सन्न°). —^{d}) Ś K1-3 D1 च; Dc1 Dn1 तु (for सु-). D2.4-8 M4 विनी(D4 च नी-; M4 सुनी)तवत् (for सुदीन°).

45 ^{a}) B5 मुने; S (G5 missing) किं नु (for भो भो). D2 S (G5 missing) [इ]यं; D6 च (for वा). D4.5.7.8 भो भो किमेतत्संवृत्तं. —^{b}) S (G5 missing) दैवं वा (for न विद्मः). D2.4-8 दैवं तु किमिदं मुने. — After 45^{ab}, D7.8 ins.:

1424* पृच्छामि त्वामहं तात संदेहं तं वदस्व मे ।

—^{cd}) Ś2 अस्त्रमिदं; S (G5 missing) एतदस्त्रं (for अस्त्रं त्विदं). G3.4 मामकश्च (for मम कश्च). D2.4-8 व्यतिक्रमो वा कश्चिन्मे (D8 °न्नो) व्यर्थमस्त्रं ततोभवत्.

46 ^{a}) D2.5.6 S (G5 missing) प्रवृत्तं हि (D2.5.6 किं); D4 च वृत्तं किं; D7 एतद्वाक्यं (all hypermetric) (for एतद्वा). —^{b}) D3.6 च; D4 lacuna (for वा). D3 पराजयः. —^{c}) Ś1 K1.2 D1 जीवितौ.

47 ^{a}) K3 B Dc1 Dn D2 नासुरा न च; K4 नासुरः सुर-; D1 न सुरासुर- (for नासुरामर-). Ś2 K1.2 गंधर्व-. D3 गंधर्वा न दिशश्चास्य. —^{b}) Ś K (K5 missing) D1 पिशाचोरगराक्षसाः; D3 न देवासुरदानवाः. —^{c}) K4 B5 Dc1 Dn1 D3.6 सर्पा; S (G5 missing) नाग-

C. 7. 9443
B. 7. 201. 53
K. 7. 202. 52

उत्सहन्तेऽन्यथा कर्तुमेतदस्त्रं मयेरितम् ।
तदिदं केवलं हत्वा युक्तामक्षौहिणीं ज्वलत् ॥ ४८
केनेमौ मर्त्यधर्माणौ नावधीत्केशवार्जुनौ ।
एतत्प्रब्रूहि भगवन्मया पृष्टो यथातथम् ॥ ४९

व्यास उवाच ।

महान्तमेतमर्थं मां यं त्वं पृच्छसि विस्मयात् ।
तत्प्रवक्ष्यामि ते सर्वं समाधाय मनः शृणु ॥ ५०
योऽसौ नारायणो नाम पूर्वेषामपि पूर्वजः ।
अजायत च कार्यार्थं पुत्रो धर्मस्य विश्वकृत् ॥ ५१
स तपस्तीव्रमातस्थे मैनाकं गिरिमाश्रितः ।
ऊर्ध्वबाहुर्महातेजा ज्वलनादित्यसंनिभः ॥ ५२
षष्टिं वर्षसहस्राणि तावन्त्येव शतानि च ।
अशोषयत्तदात्मानं वायुभक्षोऽम्बुजेक्षणः ॥ ५३
अथापरं तपस्तप्त्वा द्विस्ततोऽन्यत्पुनर्महत् ।

(for सर्प-). D4. 5. 7. 8 न सर्पयक्षा नो नागा.

48 a) D2. 5–8 G4 वृथा (for ऽन्यथा). — b) Ś1 K3 अस्त्रमेतन् (by transp.). D2 उदीरितं (for मये°). — c) K4 D1 यद् (for तद्). Ś2 K1 केवलां. S (G5 missing) तदिमां (M4 कामिकां) केवलां हत्वा. — d) Ś1 K2. 3 D3 युक्तम्; K4 B Dc1 Dn D2 शांतम्; D4. 5. 7. 8 यावद्; D6 यत्नाद्; T G2–4 एकाम् (for युक्ताम्). G2 M1. 2 अक्षोहिणीं. D2. 5. 6 G1 M1–4 ज्वलन्; D3 इमां; D7. 8 महत् (for ज्वलत्). — After 48, N (K5 missing) ins.:

1425* सर्वघाति मया मुक्तमस्त्रं परमदारुणम् ।

[Ś K1 D1 युक्तम् (for मुक्तम्).]

49 a) Dn2 D2. 4–8 मानुष- (for [इ]मौ मर्त्य-). S (G5 missing) कथं मानुष(G2 कपट)धर्माणौ. — b) T G2–4 M1–3. 5 नाधाक्षीत् (for नावधीत्). — c) D3 मे (for प्र-). — d) D8 यथा (for मया). — After 49, B Dc1 Dn D2. 4–8 ins.:

1426* श्रोतुमिच्छामि तत्त्वेन सर्वमेतन्महामुने ।

D2. 4 cont.:

1427* 　　　　संजय उवाच ।
ततः समाययौ व्यासो दृष्ट्वास्त्रं समुदीरितम् ।
तं प्राप्तं पूजयित्वा तु द्रौणिः पप्रच्छ संशयम् ।
यन्निमित्तं महास्त्रेण न दग्धौ केशवार्जुनौ ।
केनोपायेन निर्मुक्तौ तन्मे त्वं ब्रूहि तत्त्वतः ।

[D4 om. the ref. — (L. 2) D2 तत्प्राप्तं भुंजयित्वाथ (for the prior half). — (L. 3) D2 तद् (for न). — (L. 4) D2 सुव्रत (for तत्त्वतः).]

50 a) K1. 2 D1 एतद्; K4 Dn2 D2. 4. 5 एवम्; Dc1 Dn1 एनम्; D3 om. (for एतम्). Ś2 वा; Dn2 D4 G1 M मा (for मां). — b) K1. 2 B2. 4. 5 Dn2 D1. 2. 4–8 T G2 यत् (for यं). Dn1 तं; D6 मां (for त्वं). D4. 5 विस्मयं; S (G5 missing) संशयात् (for विस्म°). — c) K3. 4 B Dc1 Dn D3 तं (for तत्). S (G5 missing) तं ते(T G2. 4 तत्ते-; G3 ततो)हं संप्रवक्ष्यामि. — d) Ś2 K1–3 D1 समाहितमनाः शृणु.

51 a) M3 पुरा (for योऽसौ). — After 51ab, T G2–4 M3. 5 ins.:

1428* आदिदेवो जगन्नाथो लोककर्ता स्वयं प्रभुः ।
आद्यः सर्वस्य लोकस्य अनादिनिधनोऽच्युतः ।
व्याकुर्वते यस्य तत्त्वं श्रुतयो मुनयश्च ह ।
अतोऽजय्यः सर्वभूतैर्मनसापि जगत्पतिः ।
तस्मादिमं जेतुकामो अज्ञानतमसा वृतः । [5]
मा शुचः पुरुषव्याघ्र विद्धि तद्वदिहार्जुनम् ।
तस्य शक्तिरसौ पार्थस्तस्माच्छोकमिमं त्यज ।
विश्वेश्वरोऽथ लोकादिः परमात्मा ह्यधोक्षजः ।
सहस्रसंमितादंशादेकांशोऽयमजायत ।
देवानां हितकामार्थं लोकानां चैव सत्तम । [10]

— c) D8 [ए]व (for च). D6 उत्पन्नः स हि कार्यार्थं; S (G5 missing) व्यजायत स (G3. 4 च) कार्यार्थं (T G2 सकार्यश्च; M3 स कामार्थं). — d) K4 D1 विस्मयात्; B (except B1) T विश्वधृक्; Dc1 G1 M1. 2 °सृक्; D6 धर्मवित्; G3. 4 M3–5 विश्वदृक् (for °कृत्). G2 पुत्रो विश्वस्य विश्वधृक्.

स्थितः सर्वात्मना नित्यं प्रियेषु च हितेषु च । [10]
त्वं चैवास्माभिराश्रित्य कृतः शस्त्रसमुद्यमः ।
सुरैरिवासुरवधे शक्रं शक्रानुजाहवे ।
असंभाव्यमिदं कर्म देवैरपि जनार्दन ।
त्वद्बुद्धिबलवीर्येण कृतवानेष फल्गुनः ।
बाल्यात्प्रभृति ते कृष्ण कर्माणि श्रुतवानहम् । [15]
अमानुषाणि दिव्यानि महान्ति च बहूनि च ।
यदैवानुगृहीताः स्म त्वया स्नेहानुरागतः ।
तदैवाज्ञासिषं शत्रून्हतान्प्राप्तां च मेदिनीम् ।
मार्कण्डेयः पुराणर्षिश्चरितज्ञस्तवानघ ।
माहात्म्यमनुभावं च पुरा कीर्तितवान्मुनिः । [20]
असितो देवलश्चैव नारदश्च महातपाः ।
पितामहश्च मे व्यासस्त्वामाहुर्विधिमुत्तमम् ।

कुणपैस्). — (L. 12) Dc1 Dn1 अस्त्रैश् (for स्रग्भिश्). Dc1 (before corr.) Dn1 यंत्रैश् (for वस्त्रैश्). — (L. 15) Dc1 उपगूह्य. — (L. 16) Dn1 द्रुमांश् (for इमांश्). — After line 16, B5 reads line 25. — (L. 17) D6 क्षरंतः (for क्षरतः). — (L. 19) D6 तांश्च (for तव). — (L. 21) D5 विहतेश्वरान् (for निहते°). — Dc1 om. lines 22–23. — (L. 23) B6 निकृत्तकुबरांश्चैव (for the prior half). B4 भग्नेशान्. — (L. 27) Dc1 आलंब्य (for आलिङ्ग्य). Dc1 Dn1 D6 पांशु- (for पांसु-). — (L. 29) D5 -द्विपरथाश्व- (for -द्विपरथवाजि-). — (L. 30) D6 -कार्मुकं (for -कर्दमम्). — (L. 31) Dc1 -वृक- (for -श्ववृक-). — (L. 33) B4 प्रभो (for विभो). — (L. 35) B3 Dc1 Dn1 वापि (for चापि). — After line 36, B2 reads 41.

18

(L. 9) B2 च (for नस्). — (L. 11) B3 -समुद्यतः (for °द्यमः). — (L. 14) D6 त्वद्वीर्यबुद्धिबलेन (for the prior half). B3 Dc1 एव (for एष). — (L. 15) B3 Dc1 Dn1 transp. ते कृष्ण and कर्माणि. — After line 16, B4 reads lines 21–27. B4 om. line 17. B4 om.

त्वं तेजस्त्वं परं ब्रह्म त्वं सत्यं त्वं महत्तपः ।
त्वं श्रेयस्त्वं यशश्चाग्र्यं कारणं जगतस्तथा ।
त्वया सृष्टमिदं सर्वं जगत्स्थावरजङ्गमम् । [25]
प्रलये समनुप्राप्ते त्वां वै निविशते पुनः ।
अनादिनिधनं देवं विश्वमीशं प्रजापतिम् ।
धातारमजमव्यक्तमाहुर्वेदविदो जनाः ।
भूतात्मानं महात्मानमनन्तं विश्वतोमुखम् ।
अपि देवा न जानन्ति गुह्यमाद्यं जगत्पतिम् । [30]
नारायणं परं देवं परमात्मानमीश्वरम् ।
ज्ञानयोनिं हरिं विष्णुं मुमुक्षूणां परायणम् ।
परं पुराणं पुरुषं पुराणानां परं च यत् ।
एवमादिगुणानां ते कर्मणां दिवि चेह च ।
अतीतभूतभव्यानां संख्यातात्र न विद्यते । [35]
सर्वतो रक्षणीयाः स्म सशक्राणां दिवौकसाम् ।
यैस्त्वं सर्वगुणोपेतः सुहृन्न उपपादितः ।
इत्येवं धर्मराजेन हरिरुक्तो महायशाः ।
अनुरूपमिदं वाक्यं प्रत्युवाच जनार्दनः ।
भवतस्तपसोग्रेण धर्मेण परमेण च । [40]
साधुत्वादार्जवाच्चैव हतः पापो जयद्रथः ।
अयं च पुरुषव्याघ्र त्वदनुध्यानबृंहितः ।
हत्वा योधसहस्राणि न्यहञ्जिष्णुर्जयद्रथम् ।
कृतित्वे बाहुवीर्ये च तथैवासंभ्रमेऽपि च ।
शीघ्रतामोघवेधित्वे नास्ति पार्थसमः क्वचित् । [45]
तदयं भरतश्रेष्ठ भ्राता ते पाण्डवार्जुनः ।
सैन्यक्षयं रणे कृत्वा सिन्धुराजशिरोऽहरत् ।
ततो धर्मसुतो जिष्णुं परिष्वज्य विशां पते ।
प्रमृज्य वदनं चास्य पर्याश्वासयत प्रभुः ।
अतीव सुमहत्कर्म कृतवानसि फल्गुन । [50]
असह्यं चाविषह्यं च देवैरपि सवासवैः ।
दिष्ट्या निस्तीर्णभारोऽसि हतारिश्चासि शत्रुहन् ।
दिष्ट्या सत्या प्रतिज्ञेयं कृता हत्वा जयद्रथम् ।
एवमुक्त्वा गुडाकेशं धर्मराजो महायशाः ।
पस्पर्श पुण्यगन्धेन पृष्ठे हस्तेन पार्थिवः । [55]

19

After 7. 128. 14, S ins. :

धृतराष्ट्र उवाच ।

तथा हतेषु सैन्येषु तथा कृच्छ्रगतः स्वयम् ।
कच्चिद्दुर्योधनः सूत नाकार्षीत्पृष्ठतो रणम् ।
एकस्य च बहूनां च संनिपातो महानभूत् ।
विशेषतो हि नृपतेर्विषमं प्रतिभाति मे ।
सोऽत्यन्तसुखसंवृद्धो रक्ष्यो लोकस्य चेश्वरः । [5]
एको बहून्समासाद्य कच्चिन्नासीत्पराङ्मुखः ।
द्रोणः कर्णः कृपश्चैव कृतवर्मा च सात्वतः ।
नावारयन्कथं युद्धे राजानं राजकाङ्क्षिणः ।
सर्वोपायैर्हि युद्धेषु रक्षितव्यो महीपतिः ।
एषा नीतिः परा युद्धे दृष्टा तत्र महर्षिभिः । [10]
प्रविष्टे वै मम सुते परेषां वै महद्बलम् ।

---

lines 19–20. — (L. 23) $B_{1.3}$ त्वं परं ; Dc_1 परमं (for त्वं महत्). — (L. 25) Dc_1 Dn_1 त्वया सर्वमिदं सृष्टं (for the prior half). — (L. 26) B_2 हि (for वै). Dn_1 त्वं हि निवेशनं पुनः (for the post. half). — (L. 27) B_3 जगत्पतिं (for प्रजापतिम्). — B_4 om. lines 28–33. Dn_1 repeats line 28 after line 30. — (L. 28) Dn_1 (first time) त्वं धातारमजं व्यक्तम् (for the prior half). — (L. 30) $B_{1.3}$ Dc_1 त्वाद्यं (for आद्यं). — (L. 33) B_3 Dc_1 Dn_1 परं पराणां (Dc_1 पुराणां ; Dn_1 पुराणं) परमं (for the prior half). — (L. 35) B_4 -भव्यं च (for -भव्यानां). $B_{1.5}$ संख्या तात ; B_4 संख्या तावन् (for संख्यातात्र). — (L. 36) Dn_1 दिवौकसः. Bom. ed. शक्रेणेव दिवौकसः (for the post. half). — Before line 38, B_4 ins. संजय उवाच. B_5 om. lines 38–42. — (L. 38) B_3 महौजसा (for महायशाः). — (L. 40) B_3 Dn_1 भवता (for °तस्). Dn_1 वः (for च). — (L. 41) B_3 आर्जवत्वाच्च ; Dc_1 Dn_1 अर्जुनाच्चैव (for आर्जवा°). — (L. 42) B_1 -संवृतः (for -बृंहितः). — (L. 45) B_3 -वेदित्वे ; B_5 -बुद्धित्वे (for -वेधित्वे). — (L. 46) B_5 तेद्य यद् (for पाण्डव). — (L. 49) B_4 Dn_1 तस्य (for चास्य). — (L. 51) $B_{1.2}$ अशक्यं (for असह्यं). — (L. 53) B_1 हत्वा पापं जयद्रथं (for the post. half). — (L. 54) B_2 (marg.) युधिष्ठिरः (for महायशाः).

19

(L. 1) G_1 $M_{1-4.5}$ (*sup. lin.* as above) गतेषु (for हतेषु). T G_{2-4} -गतेषु च (for -गतः स्वयम्). — (L. 4) M_1 नृपतिभिर् ; $M_{4.5}$ [ऽ]पि नृपतेर् (for हि नृ°).

मामका रथिनां श्रेष्ठाः किमकुर्वत संजय ।

संजय उवाच ।

राजन्संग्राममाश्चर्यं पुत्रस्य तव भारत ।

एकस्य च बहूनां च शृणु मे ब्रुवतोऽद्भुतम् ।

द्रोणेन वार्यमाणोऽसौ कर्णेन च कृपेण च । [15]

प्राविशत्पाण्डवीं सेनां मकरः सागरं यथा ।

किरन्निषुसहस्राणि तत्र तत्र तदा तदा ।

पाञ्चालान्पाण्डवांश्चैव विव्याध निशितैः शरैः ।

यथोद्यम्य ततः सूर्यो रश्मिभिर्नाशयेत्तमः ।

तथा पुत्रस्तव बलं नाशयत्तन्महाबलः । [20]

20

After 7. 131. 24^{ab}, K4 B Dc1 Dn D1. 5 ins. :

अभ्यधावत्ततो द्रोणो यदुवीरजिघांसया ।

तमायान्तमभिप्रेक्ष्य युधिष्ठिरपुरोगमाः ।

परिवव्रुर्महात्मानं परीप्सन्तो यदूद्वहम् ।

ततः प्रववृते युद्धं द्रोणस्य सह पाण्डवैः ।

बलेरिव सुरैः पूर्वं त्रैलोक्यजयकाङ्क्षया । [5]

ततः सायकजालेन पाण्डवानीकमावृणोत् ।

भारद्वाजो महातेजा विव्याध च युधिष्ठिरम् ।

सात्यकिं दशभिर्बाणैर्विंशत्या पार्षतं शरैः ।

भीमसेनं च नवभिर्नकुलं पञ्चभिस्तथा ।

सहदेवं तथाष्टाभिः शतेन च शिखण्डिनम् । [10]

द्रौपदेयान्महाबाहुः पञ्चभिः पञ्चभिः शरैः ।

विराटं मत्स्यमष्टाभिर्द्रुपदं दशभिः शरैः ।

युधामन्युं त्रिभिः षड्भिरुत्तमौजसमाहवे ।

अन्यांश्च सैनिकान्विद्ध्वा युधिष्ठिरमुपाद्रवत् ।

ते वध्यमाना द्रोणेन पाण्डुपुत्रस्य सैनिकाः । [15]

प्राद्रवन्वै भयाद्राजन्सार्तनादा दिशो दश ।

काल्यमानं तु तत्सैन्यं दृष्ट्वा द्रोणेन फल्गुनः ।

किंचिदागतसंरम्भो गुरुं पार्थोऽभ्ययाद्द्रुतम् ।

दृष्ट्वा द्रोणस्तु बीभत्सुमभिधावन्तमाहवे ।

संन्यवर्तत तत्सैन्यं पुनर्यौधिष्ठिरं नृप । [20]

ततो युद्धमभूद्भूयो भारद्वाजस्य पाण्डवैः ।

द्रोणस्तव सुतै राजन्सर्वतः परिवारितः ।

व्यधमत्पाण्डुसैन्यानि तूलराशिमिवानलः ।

तं ज्वलन्तमिवादित्यं दीप्तानलसमद्युतिम् ।

राजन्ननिशमत्यन्तं दृष्ट्वा द्रोणं शरार्चिषम् । [25]

मण्डलीकृतधन्वानं तपन्तमिव भास्करम् ।

दहन्तमहितान्सैन्ये नैनं कश्चिदवारयत् ।

यो यो हि प्रमुखे तस्य तस्थौ द्रोणस्य पूरुषः ।

तस्य तस्य शिरश्छित्त्वा ययौ द्रोणशरः क्षितिम् ।

एवं सा पाण्डवी सेना वध्यमाना महात्मना । [30]

प्रदुद्राव पुनर्भीता पश्यतः सव्यसाचिनः ।

— G1 M1. 3-5 om. lines 8-10. — (L. 10) G2 पुरा (for परा). G5 मनीषिभिः (for महर्षिभिः). — (L. 11) T G2 वा (for वै). G1 M1-3. 5 सु- (for वै). — (L. 12) MSS. अकुर्वत. — (L. 13) G1 M तव पुत्रस्य भारत (for the post. half). — (L. 14) G1 M1-3. 5 वदतो (for ब्रुवतो). — (L. 15) M4 च (for ऽसौ). G1 M1-3. 5 वार्यमाणस्तु द्रोणेन (for the prior half). G2 कृपणेन (for च कृपेण). — (L. 17) G3. 4 तथा तथा. — (L. 18) T G2 M1. 2. 5 विव्याथ (for °ध). — (L. 19) G3. 4 गतः (for ततः). G1 M यथोद्यन्वि(M4 °द्वि)- ततं सूर्यो (for the prior half). G3 रथिभिर् (for रश्मि°). M1. 2 ततः (for तमः). — (L. 20) M1 यथा (for तथा). G1 M1. 2. 4. 5 महारथः (for °बलः).

20

(L. 1) B4 अभ्यद्रवत् (for अभ्यधावत्). — (L. 3) B1 यदूत्तमं (for °द्वहम्). — (L. 5) Dn1 त्रैलोक्यस्याभिकांक्षया (for the post. half). — (L. 7) B1 महाराज (for °तेजा). — (L. 12) D5 निशितैः (for दशभिः). — (L. 17) D1 फाल्गुनिः; Some MSS. फाल्गुनः (for फल्गुनः). — (L. 18) D5 -संतप्तो (for -संरम्भो). — (L. 19) K4 om. from the prior half up to the prior half of line 21. Dc1 Dn1 D5 द्रोणं (for द्रोणस्). — (L. 20) D1. 5 स (for सं-). Bom. ed. बलं (for नृप). — (L. 21) B1 तयोर् (for ततो). — (L. 23) B2 (marg. as above) तृण- (for तूल-). — (L. 24) B1 Dc1 [अ]त्युग्रं (for [आ]दित्यं). — (L. 25) B1 Dc1 D5 असंतं (for अत्यन्तं). Dn2 द्रोण- (for द्रोणं). Dn1 शरान्वितं (for शरार्चिषम्). — (L. 26) B1. 2 Dc1 Dn1 मंडलीभूत- (for °कृत-). — (L. 27) B1 संस्थे (for सैन्ये). Dn1 दहंतमिव तत्सैन्यं (for the prior half). B1 नैकं (for नैनं). — (L. 29) B4 ययुर्. K4 B3 ययु-

संप्रभग्नं बलं दृष्ट्वा द्रोणेन निशि भारत ।
गोविन्दमब्रवीज्जिष्णुर्गच्छ द्रोणरथं प्रति ।
ततो रजतगोक्षीरकुन्देन्दुसदृशप्रभान् ।
चोदयामास दाशार्हो हयान्द्रोणरथं प्रति । [35]
भीमसेनोऽपि तं दृष्ट्वा यान्तं द्रोणाय फल्गुनम् ।
स्वसारथिमुवाचेदं द्रोणानीकाय मां वह ।
सोऽपि तस्य वचः श्रुत्वा विशोको वाहयद्धयान् ।
पृष्ठतः सत्यसन्धस्य जिष्णोर्भरतसत्तम ।
तौ दृष्ट्वा भ्रातरौ यत्तौ द्रोणानीकमभिद्रुतौ । [40]
पाञ्चालाः सृञ्जया मत्स्याश्चेदिकारूषकोशलाः ।
अन्वगच्छन्महाराज केकयाश्च महारथाः ।
ततो राजन्नभूद्घोरः संग्रामो लोमहर्षणः ।
बीभत्सुर्दक्षिणं पार्श्वमुत्तरं च वृकोदरः ।
महद्भ्यां रथवृन्दाभ्यां बलं जगृहतुस्तव । [45]
तौ दृष्ट्वा पुरुषव्याघ्रौ भीमसेनधनंजयौ ।
धृष्टद्युम्नोऽभ्ययाद्राजन्सात्यकिश्च महाबलः ।
चण्डवाताभिपन्नानामुदधीनामिव स्वनः ।
आसीद्राजन्बलौघानां तदान्योन्यमभिघ्नताम् ।
सौमदत्तिवधात्क्रुद्धो दृष्ट्वा सात्यकिमाहवे । [50]

21

After 7. 170. 22ab, G1 M1. 2 ins. :

प्रपेतुः कुञ्जरास्तत्र शस्त्रसंघैर्निपातिताः ।
व्यदीर्यमाणा गिरयो वज्रनुन्ना यथा पुरा ।
हस्तिहस्तैश्च संछिन्नैर्गात्रैश्चैव विशां पते ।
अपरैश्च तथा बाणैः कुन्तैश्च कनकोज्ज्वलैः ।
संकीर्णा पृथिवी जज्ञे मांसशोणितकर्दमा । [5]
गजेभ्यश्च्यवमानानां यन्तॄणां तत्र भारत ।
विभुजानां विशीर्णानां न्यस्तकार्मुकवर्मणाम् ।
पूर्णमायोधनं जज्ञे प्रेतराजपुरोपमम् ।
अङ्कुशैरपविद्धैश्च तोमरैश्च महाधनैः ।
अलंकारैश्च नागानां ग्रैवेयैश्च सकङ्कटैः । [10]
कक्ष्याभिरग्निकुण्डैश्च यन्त्रैश्चैव पताकिभिः ।
शक्तिभिश्च महाराज बाणैश्च नतपर्वभिः ।
रथिनां च रथैर्भग्नैश्छिन्नैर्वा युगदण्डकैः ।
चक्रैर्विमथितैर्भग्नैर्युगैरक्षैश्च भूषिता ।
तूणीरैरपविद्धैश्च चापैश्च सुमहाधनैः । [15]
अनुकर्षैः पताकाभिर्योक्त्रैश्चैव विशां पते ।
रश्मिभिश्च प्रतोदैश्च किङ्किणीभिश्च मारिष ।
कवचैश्च तथा दीप्तैश्चामरव्यजनैरपि ।
छत्रैश्च चन्द्रसंकाशैर्वृष्ट्यातपनिवारिभिः ।
अङ्गुलित्रैः सकेयूरैर्दीप्तैर्निष्कैश्च काञ्चनैः । [20]
कर्णसूत्रैः किरीटैश्च मुकुटैश्च महाधनैः ।
चित्रैर्वस्त्रैरलंकारैः कुण्डलैश्चापि भारत ।
अपविद्धैस्तथा शीर्षैर्बाहुभिश्च महात्मनाम् ।
संछन्ना पृथिवी रेजे तत्र तत्र यथातथम् ।
उरश्छदैस्तथा चित्रैर्घण्टाजालैश्च भास्वरैः । [25]
निहतैस्तुरगैश्चैव निर्जिह्वैः शोणितोक्षितैः ।
हयारोहपरैश्चैव निर्दग्धैरस्त्रतेजसा ।
नानाङ्गावयवैर्हीना योधाः सस्तुर्भयार्दिताः ।
चुक्रुशुस्तात तातेति हा हा पुत्रेति चासकृत् ।
योधा नूनं ते निधनं प्राप्ताः पाण्डवेया महारथाः । [30]
वासुदेवश्च वार्ष्णेयस्तथा सोमकसृञ्जयाः ।
जीवत्सु समरे तेषु न हि वीरेषु सैनिकाः ।
इमामवस्थां सहसा गच्छेयुर्वै कथंचन ।
इत्यब्रुवंस्तथा योधा हन्यमानास्तदा रणे ।
क्रुद्धेन द्रोणपुत्रेण कालेनेव युगक्षये । [35]
हन्यमानास्तथास्त्रेण तेन नारायणेन ते ।

द्रोंणशराः क्षितिं (for the post. half). —(L. 31) B1. 3. 5 Dc1 Dn1 दुद्राव वै (B5 च) (for प्रदुद्राव). —(L. 34) D5 -संकाश- (for -गोक्षीर-). D5 -क्षीरकुंदेंदुसप्रभान् (for the post. half). —(L. 36) Some MSS. फाल्गुनं. —(L. 37) B1. 3 स्वं; D5 स (for स्व-). —(L. 40) Dn1 यांतौ (for यत्तौ). —(L. 41) Dn1 पंचालाः. B1-3. 5 -कोषलाः; Bom. ed. -कोसलाः. —(L. 42) Dn2 D5 कैकयाश् (for केक°). —(L. 45) K4 तदा (for तव). —(L. 46) K4 पुरुषव्याघ्रं (for °व्याघ्रौ). —(L. 47) Dc1 Dn1 महारथः (for महाबलः). —Lines 48–49 = (var.) 7. 131. 20. —(L. 50) Dn1 सोमदत्ति- (for सौमदत्ति-).

21

(L. 2) G1 यथापुरं. —(L. 24) G1 संछिन्ना (for संछन्ना). —(L. 30) Prior half hypermetric.

22

After 7. 171. 36ab, D6 ins. :

तमात्मभुजवेगेन विकर्षन्तं शरासनम् ।
तं तु दृष्ट्वा सुसंक्रुद्धं कालानलयमोपमम् ।
विमुञ्चन्विशिखांस्तूर्णं पार्षतोऽभ्यद्रवद्रणे ।
तौ द्रौणिः क्रोधताम्राक्षो दिधिक्षन्निव तेजसा ।
छादयामास बाणौघैर्धृष्टद्युम्नं समन्ततः । [5]
धृष्टद्युम्नोऽपि संभ्रान्तः शरेणानतपर्वणा ।
प्रत्यविध्यत संक्रुद्धः पार्षतं प्रयतो बलात् ।
तस्य द्रौणिर्धनुश्छित्त्वा स्थूणेन परवीरहा ।
धृष्टद्युम्नं त्रिसप्तत्या विव्याध निशितैर्नदन् ।
तदपास्य धनुश्छिन्नं धृष्टद्युम्नः प्रतापवान् । [10]
अन्यत्कार्मुकमादाय सोऽश्वत्थामानमार्दयत् ।
स तदप्यस्य संक्रुद्धश्चिच्छेद परमास्त्रवित् ।
तं चाप्यवाकिरद्बाणैर्धृष्टद्युम्नं परंतपः ।
ततः स पार्षतस्तूर्णं शक्तिं हेमपरिष्कृताम् ।
चिक्षेप परमक्रुद्धो ज्वलन्तीमशनीमिव । [15]
तामापतन्तीं सहसा व्यालीकाल इवाहवे ।
चिच्छेद सप्तधा राजञ्शरैः परमतेजनैः ।
तां निकृत्तां ततो दृष्ट्वा द्रौणिना पार्षतस्ततः ।
धनुरन्यत्समादाय समरे वेगवत्तरम् ।
ततोऽविध्यत्सुतीक्ष्णाभ्यां शराभ्यां द्रौणिमाहवे । [20]
ततो द्वाभ्यां सुतीक्ष्णाभ्यां भल्लाभ्यां तत्र कार्मुकम् ।
द्रौणिर्द्रुपदपुत्रस्य चिच्छेद प्रहसन्निव ।
तं च बाणैर्महातेजाः पुनरन्यैः समावृणोत् ।
साश्वसूतरथं तूर्णं छादयामास संयुगे ।
तस्य चानुचरान्सर्वान्दीप्तास्त्रान्पार्श्वतः स्थितान् । [25]
व्यद्रावयत संक्रुद्धः शरैः संनतपर्वभिः ।
ब्रह्मदत्तं ततो बाणं धृष्टद्युम्नजिघांसया ।
द्रोणपुत्रः प्रचिक्षेप सात्यकिस्तद्द्विधाच्छिनत् ।
सात्यकिस्तु तमादाय राजपुत्रं शरार्दितम् ।
अष्टाभिर्निशितैर्बाणैरश्वत्थामानमार्दयत् । [30]
अशीत्या पुनराहत्य नानारूपैरमर्षणः ।
विव्याधास्य त्रिभिः सूतं चतुर्भिश्चतुरो हयान् ।
एवमुक्त्वा शरैस्तीक्ष्णैः सात्यकिं तूर्णमावृणोत् ।
संरब्धः क्रोधताम्राक्षो द्रोणपुत्रः प्रतापवान् ।
सात्यकिस्तु ततः क्रुद्धः शरेणानतपर्वणा । [35]
द्रोणपुत्रं समाजघ्ने सर्वसैन्यस्य पश्यतः ।
ततो द्रौणिर्महाराज बाणैः संछाद्य सात्यकिम् ।
धनुः क्रोधपरीतात्मा चिच्छेदाशु महास्त्रवित् ।
ततः शक्तिं महाघोरां हेमदण्डामयस्मयीम् ।
चिक्षेप सात्यकिस्तूर्णं द्रोणपुत्रजिघांसया । [40]
तामापतन्तीं सहसा शक्रमुक्तामिवाशनिम् ।
अप्राप्तामेव चिच्छेद द्रौणिः सप्तभिराशुगैः ।
तां निकृत्तां शरैर्दृष्ट्वा द्रौणिना सायकैर्भृशम् ।
सोऽन्यत्कार्मुकमादाय भारघ्नं वेगवत्तरम् ।
तद्विकृष्य महच्चापं सात्यकिः सात्वतां वरः । [45]
सायकैर्बहुभिस्तूर्णमश्वत्थामानमार्दयत् ।
ततो द्रौणिः सुसंरब्धः शरजालेन माधवम् ।
छादयामास समरे सात्यकिं क्रोधमूर्छितः ।
तान्यस्य शरजालानि अन्तरिक्षे विशां पते ।
अप्राप्तानेव चिच्छेद युयुधानो महारथः । [50]
ततः पूर्णायतोत्सृष्टैर्हेमपुङ्खैः शिलाशितैः ।
बाणैर्विव्याध सुदृढं द्रोणपुत्रममर्षितः ।
तथा स विद्धः सुभृशं द्रोणपुत्रोऽत्यमर्षणः ।
शैनेयं समरे क्रुद्धः प्रदहन्निव चक्षुषा ।
अवाकिरदमेयात्मा बाणवर्षैः समन्ततः । [55]
पर्वतं वारिधाराभिस्तपान्ते जलदो यथा ।

23

After 7. 171. 46, K4 Dn2 D1. 5 T ins. :

धनुर्ध्वजं च संयत्तैश्चिच्छेद कृतहस्तवत् ।
स साश्वं व्यधमच्चापि रथं हेमपरिष्कृतम् ।

22

Lines 31-32 = (var.) 7. 171. 46. — After line 32, D6 reads 7. 171. 47-48.

23

(L. 1) K4 T संयत्तश् (for °त्तैश्). — (L. 2) K4 D1 तिलशो; D5 स शंखं (for स साश्वं). K4 D1 -परि-

हृदि विव्याध समरे त्रिंशता सायकैर्भृशम् ।
एवं स पीडितो राजन्नश्वत्थामा महाबलः ।
शरजालैः परिवृतः कर्तव्यं नान्वपद्यत । [5]
एवं गते गुरोः पुत्रे तव पुत्रो महारथः ।
कृपकर्णादिभिः सार्धं शरैः सात्वतमावृणोत् ।
दुर्योधनस्तु विंशत्या कृपः शारद्वतस्त्रिभिः ।
कृतवर्माथ दशभिः कर्णः पञ्चाशता शरैः ।
दुःशासनः शतेनैव वृषसेनश्च सप्तभिः । [10]
सात्यकिं विव्यधुस्तूर्णं समन्तान्निशितैः शरैः ।
ततः स सात्यकी राजन्सर्वानेव महारथान् ।
विरथान्विमुखांश्चैव क्षणेनैवाकरोन्नृप ।
अश्वत्थामा तु संप्राप्य चेतनां भरतर्षभ ।
चिन्तयामास दुःखार्तो निःश्वसंश्च पुनः पुनः । [15]
ततो रथान्तरं द्रौणिः समारुह्य परंतपः ।
सात्यकिं वारयामास किरञ्शरशतान्बहून् ।
तमापतन्तं संप्रेक्ष्य भारद्वाजसुतं रणे ।
विरथं विमुखं चैव पुनश्चक्रे महारथः ।
ततस्ते पाण्डवा राजन्दृष्ट्वा सात्यकिविक्रमम् । [20]
शङ्खशब्दान्भृशं चक्रुः सिंहनादांश्च नेदिरे ।
एवं तं विरथं कृत्वा सात्यकिः सत्यविक्रमः ।
जघान वृषसेनस्य त्रिसाहस्रान्महारथान् ।
अयुतं दन्तिनां सार्धं कृपस्य निजघान सः ।
पञ्चायुतानि चाश्वानां शकुनेर्निजघान ह । [25]
ततो द्रौणिर्महाराज रथमारुह्य वीर्यवान् ।
सात्यकिं प्रति संक्रुद्धः प्रययौ तद्वधेप्सया ।
पुनस्तमागतं दृष्ट्वा शैनेयो निशितैः शरैः ।
अदारयत्क्रूरतरैः पुनः पुनररिंदम ।

24

After 7. 171. 65, K_4 B D_{c1} Dn $D_{1.5.6}$ T_1 ins.:

मालवं पौरवं चैव युवराजं च चेदिपम् ।
दृष्ट्वा समक्षं निहतं द्रोणपुत्रेण पाण्डवः ।
भीमसेनो महाबाहुः क्रोधमाहारयत्परम् ।
ततः शरशतैस्तीक्ष्णैः संक्रुद्धाशीविषोपमैः ।
छादयामास समरे द्रोणपुत्रं परंतपः । [5]
ततो द्रौणिर्महातेजाः शरवर्षं निहत्य तम् ।
विव्याध निशितैर्बाणैर्भीमसेनममर्षणः ।
ततो भीमो महाबाहुर्द्रौणेर्युधि महाबलः ।
क्षुरप्रेण धनुश्छित्त्वा द्रौणिं विव्याध पत्रिणा ।
तदपास्य धनुश्छिन्नं द्रोणपुत्रो महामनाः । [10]
अन्यत्कार्मुकमादाय भीमं विव्याध पत्रिभिः ।
तौ द्रौणिभीमौ समरे पराक्रान्तौ महाबलौ ।
अवर्षतां शरवर्षं वृष्टिमन्ताविवाम्बुदौ ।
भीमनामाङ्किता बाणाः स्वर्णपुङ्खाः शिलाशिताः ।
द्रौणिं संछादयामासुर्घनौघा इव भास्करम् । [15]
तथैव द्रौणिनिर्मुक्तैर्भीमः संनतपर्वभिः ।
अवाकीर्यत स क्षिप्रं शरैः शतसहस्रशः ।
स छाद्यमानः समरे द्रौणिना रणशालिना ।

स्कृतं. —(L. 3) T विव्याथ (for °ध). $D_{1.5}$ त्रिंशतैः. —(L. 7) D_1 शल्य- (for कृप-). — T_2 om. lines 6–29. —(L. 16) Bom. ed. अथो (for ततो). K_4 D_5 रथांतरे. —(L. 21) T_1 चक्रिरे (for नेदिरे). —(L. 27) D_1 वधेच्छया (for °प्सया). —(L. 29) D_1 क्रूरनखैः (for °तरैः).

24

(L. 1) D_1 om. from. मालवं up to युवराजं (in line 1). D_6 मालव्यं (for °वं). —(L. 2) B_1 D_{c1} D_{n1} D_6 निहतान्. —(L. 4) D_1 स क्रुद्धोथ; D_6 भुजगाभैर् (for संक्रुद्धाशी-). —(L. 5) $D_{1.6}$ परंतप. —(L. 6) $B_{1.3}$ D_{c1} D_{n1} D_6 तत् (for तम्). D_1 ततो द्रौणिं च विव्याध पत्रिणा धनुराच्छिनत्. — K_4 om. (? hapl.) lines 7-11. D_1 om. lines 7–9. —(L. 7) D_{n2} D_2 om. (hapl.) from निशितैर् up to विव्याध (in line 9). —(L. 9) B_5 पत्रिभिः. — D_6 om. (hapl.) lines 10–11. —(L. 12) D_6 ततो द्रौणिर्भीमसेनः (for the prior half). D_6 महारथौ (for °बलौ). —(L. 13) D_{n2} अवर्षेतां. B_1 (marg.) शराशरं; $D_{1.5}$ शरवर्षैर् (for °र्षं). D_6 शरवर्षाण्यवर्षेतां प्रावृषीव बलाहकौ. —(L. 15) D_{n2} संछादयामास. D_{n2} D_6 T_1 मेघौघा (for घनौघा). —(L. 16) D_6 तथैव द्रौणिना मुक्ता भीमं संनतपर्वणः. —(L. 17) B_4 अवकीर्यत. D_6 अवाकिरन्नणे तूर्णं (for the prior half). —(L. 18) D_{n2} $D_{1.6}$ सं- (for स). B_4 बल- (for रण-). B_1 D_{c1} D_{n1} -मालिना; $B_{3.8}$ -मानिना; D_5 -शोभिना (for -शालिना). D_6 द्रौणिना पांडवर्षभः (for the post. half). —(L. 20) B_4 स्वर्णपुंखैर्

न विव्यथे महाराज तदद्भुतमिवाभवत् ।
ततो भीमो महाबाहुः कार्तस्वरविभूषितान् । [20]
नाराचान्दश संप्रैषीद्यमदण्डनिभाञ्शितान् ।
ते जत्रुदेशमासाद्य द्रोणपुत्रस्य मारिष ।
निर्भिद्य विविशुस्तूर्णं वल्मीकमिव पन्नगाः ।
सोऽतिविद्धो भृशं द्रौणिः पाण्डवेन महात्मना ।
ध्वजयष्टिं समाश्रित्य न्यमीलयत लोचने । [25]
स मुहूर्तात्पुनः संज्ञां लब्ध्वा द्रौणिर्नराधिप ।
क्रोधं परममातस्थौ समरे रुधिरोक्षितः ।
दृढं सोऽभिहतस्तेन पाण्डवेन महात्मना ।
वेगं चक्रे महाबाहुर्भीमसेनरथं प्रति ।
तत आकर्णपूर्णानां शराणां तिग्मतेजसाम् । [30]
शतमाशीविषाभानां प्रेषयामास भारत ।
भीमोऽपि समरश्लाघी तस्य वीर्यमचिन्तयत् ।
तूर्णं प्रासृजदुग्राणि शरवर्षाणि पाण्डवः ।
ततो द्रौणिर्महाराज छित्त्वास्य विशिखैर्धनुः ।
आजघानोरसि क्रुद्धः पाण्डवं निशितैः शरैः । [35]
ततोऽन्यद्धनुरादाय भीमसेनोऽत्यमर्षणः ।
विव्याध निशितैर्बाणैर्द्रौणिं पञ्चभिराहवे ।
जीमूताविव घर्मान्ते तौ शरौघप्रवर्षिणौ ।
अन्योन्यक्रोधताम्राक्षौ छादयामासतुर्युधि ।
तलशब्दैस्ततो घोरैस्त्रासयन्तौ परस्परम् । [40]
अयुध्येतां सुसंरब्धौ कृतप्रतिकृतैषिणौ ।
ततो विस्फार्य सुमहच्चापं रुक्मविभूषितम् ।
भीमं प्रैक्षत स द्रौणिः शरानस्यन्तमन्तिकात् ।
शरद्यहर्मध्यगतो दीप्तार्चिरिव भास्करः ।
आददानस्य विशिखान्संदधानस्य चाशुगान् । [45]
विकर्षतो मुञ्चतश्च नान्तरं ददृशुर्जनाः ।
अलातचक्रप्रतिमं तस्य मण्डलमायुधम् ।
द्रौणेरासीन्महाराज बाणान्विसृजतस्तदा ।
धनुश्च्युताः शरास्तस्य शतशोऽथ सहस्रशः ।
आकाशे प्रत्यदृश्यन्त शलभानामिवायतीः । [50]
ते तु द्रौणिधनुर्मुक्ताः शरा हेमविभूषिताः ।
अजस्रमन्वकीर्यन्त घोरा भीमरथं प्रति ।
तत्राद्भुतमपश्याम भीमसेनस्य विक्रमम् ।
बलं वीर्यं प्रभावं च व्यवसायं च भारत ।
तां स मेघादिवोद्भूतां बाणवृष्टिं समन्ततः । [55]
जलवृष्टिं महाघोरां तपान्त इव चिन्तयन् ।
द्रोणपुत्रवधप्रेप्सुर्भीमो भीमपराक्रमः ।
अमुञ्चच्छरवर्षाणि प्रावृषीव बलाहकः ।

(for कार्तस्वर-). — (L. 21) D6 नाराचान्प्रेषयामास (for the prior half). K4 सितान्; D6 तदा (for शितान्). — (L. 23) Dn2 [आ]विविशुस्. — (L. 25) B3 समासाद्य (for °श्रित्य). — (L. 26) D6 मुहूर्तात्स पुनस्तस्मिन् (for the prior half). D6 लब्धसंज्ञो (for लब्ध्वा द्रौणिर्). B5 जनाधिप; Dn1 महारथः (for नराधिप). — (L. 27) D6 आतस्थे. D6 समरे तु विरोधिनः (for the post. half). — (L. 28) D6 पीडितस् (for ऽभिहतस्). — (L. 29) B4 महाराज (for °बाहुर्). — (L. 30) T1 तत्र (for तत). D5 तत आकृष्य कर्णांतं (for the prior half). D6 शराणां गार्द्धवाससां (for the post. half). — (L. 31) Dc1 Dn1 D1. 5 आशीविषाभाणां. — (L. 32) B Dn अचिंतयन्. — (L. 33) B2 पूर्णं (for तूर्णं). D6 प्रेषयद् (for प्रासृजद्). — (L. 34) B3 महातेजाश् (for °राज). D6 निशितैर् (for विशिखैर्). — (L. 36) B5 D6 ह्यमर्षणः (for ऽत्य°). — (L. 37) D6 आशुगैः (for आहवे). B5 द्रौणिं विव्याध पंचभिः (for the post. half). — (L. 38) D5 जीमूतम्. — (L. 39) B1. 2 Dc1 D1. 5. 6 अन्योन्यं (for °न्य-). B5 Dc1 Dn1 मृधे (for युधि). — Dc1 Dn1 om. lines 40-45. — (L. 40) D6 -शब्दरवैर् (for -शब्दैस्ततो). D6 त्रासयानौ; T1 छादयंतौ (for त्रासयन्तौ). Dn2 छादये-***स्परं (for the post. half). — (L. 42) D6 विकृष्य (for विस्फार्य). D1. 5 रत्न- (for रुक्म-). D6 -परिस्कृतं (for -विभूषितम्). — (L. 43) D6 दिधक्षन्निव चक्षुषा (for the post. half). — After line 43, D6 ins.:

ततो द्रौणिरशान्तश्च भृशं क्रुद्धो व्यकासत ।

— (L. 44) D5 शरन्मध्यगतो भास्वान् (for the prior half). — (L. 46) D6 ददृशे नांतरं जनः (for the post. half). — (L. 48) Dn1 विसृजतुस्. B1 तथा (for तदा). — (L. 49) D6 शरान्विसृजतस्तस्य (for the prior half). — (L. 51) Dn1 तत् (for ते). K4 Dc1 D1. 5 -विनिर्मुक्ताः (for -धनु°). — (L. 52) D1. 5 अनुकीर्यंत; D6 अवकीर्यंते (for अन्वकीर्यन्त). — (L. 55) Dn [उ]द्धूतां (for [उं]-द्भूतां). B4 भीममेघादिवोद्भूतां; D6 तां स मेघरवोद्भूतां (for the prior half). Dn1 D6 शरवृष्टिं (for बाण°). D6 समुत्थितां (for समन्ततः). — (L. 56) D6 शरवृष्टिं तु तां घोरा-

तद्रुक्मपृष्ठं भीमस्य धनुर्घोरं महद्रणे ।
विकृष्यमाणं विबभौ शक्रचापमिवापरम् । [60]
तस्माच्छराः प्रादुरासञ्शतशोऽथ सहस्रशः ।
संछादयन्तः समरे द्रौणिमाहवशोभिनम् ।
तयोर्विसृजतोरेवं शरजालानि मारिष ।
वायुरप्यन्तरा राजन्नाशक्नोत्प्रतिसर्पितुम् ।
तथा द्रौणिर्महाराज शरान्हेमविभूषितान् । [65]
तैलधौतान्प्रसन्नाग्रान्प्राहिणोद्वधकाङ्क्षया ।
तानन्तरिक्षे विशिखैस्त्रिधैकैकमशातयत् ।
विशेषयन्द्रोणसुतं तिष्ठ तिष्ठेति चाब्रवीत् ।
पुनश्च शरवर्षाणि घोराण्युग्राणि पाण्डवः ।
व्यसृजद्बलवान्क्रुद्धो द्रोणपुत्रवधेप्सया । [70]
ततोऽस्त्रमायया तूर्णं शरवृष्टिं निवार्य ताम् ।
धनुश्चिच्छेद भीमस्य द्रोणपुत्रो महास्त्रवित् ।
शरैश्चैनं सुबहुभिः क्रुद्धः संख्ये पराभिनत् ।
स छिन्नधन्वा बलवान्रथशक्तिं सुदारुणाम् ।
वेगेनाविध्य चिक्षेप द्रोणपुत्ररथं प्रति । [75]
तामापतन्तीं सहसा महोल्काभां शितैः शरैः ।
चिच्छेद समरे द्रौणिर्दर्शयन्पाणिलाघवम् ।
एतस्मिन्नन्तरे भीमो दृढमादाय कार्मुकम् ।
द्रौणिं विव्याध विशिखैः स्मयमानो वृकोदरः ।
ततो द्रौणिर्महाराज भीमसेनस्य सारथिम् । [80]
ललाटे दारयामास शरेणानतपर्वणा ।
सोऽतिविद्धो बलवता द्रोणपुत्रेण सारथिः ।
व्यामोहमगमद्राजन्रश्मीनुत्सृज्य वाजिनाम् ।
ततोऽश्वाः प्राद्रवंस्तूर्णं मोहिते रथसारथौ ।
भीमसेनस्य राजेन्द्र पश्यतां सर्वधन्विनाम् । [85]
तं दृष्ट्वा प्रद्रुतैरश्वैरपकृष्टं रणाजिरात् ।

25

After 7. 173. 56^{ab}, N (K_5 missing) ins. :

गन्धमादनविन्ध्यौ च कृत्वा वंशध्वजौ हरः ।
पृथ्वीं ससागरवनां रथं कृत्वा तु शंकरः ।
अक्षं कृत्वा तु नागेन्द्रं शेषं नागं त्रिलोचनः ।
चक्रं कृत्वा तु चन्द्रार्कौ देवदेवः पिनाकधृक् ।
अणी कृत्वैलपत्रं च पुष्पदन्तं च त्र्यम्बकः । [5]
यूपं कृत्वा च मलयमवनाहं च तक्षकम् ।
योक्त्राङ्गानि च चत्वारि कृत्वा शर्वः प्रतापवान् ।

मापतंतीमचिंतयन्. — (L. 57) D_1 -वधे प्रेप्सुर्. — (L. 58) D_6 मुमोच (for अमुञ्चत्). — (L. 59) Dn_2 om. from द्रणे up to परम् (in line 60). K_4 D_1 महारथं ; Dc_1 D_5 महारणे (for महद्रणे). — (L. 60) D_6 शक्रायुधमिवाततं (for the post. half). — (L. 63) D_6 -वर्षाणि (for -जालानि). — (L. 64) Dn_1 D_5 न शक्नोत्. Dn_2 D_6 T_1 न शक्नोत्स (D_6 °क्नोति) विसर्पितुं (for the post. half). — (L. 65) K_4 तदा ; D_6 ततों (for तथा). — (L. 66) D_6 कर्मारमार्जितान्क्रुद्धः (for the prior half). — (L. 67) $B_{1-3.5}$ अंतरीक्षे. D_5 विविधैस् (for विशिखैस्). — (L. 68) D_5 द्रोणसुतस्. — (L. 71) D_5 शरवर्षं (for °वृष्टिं). D_6 प्रधम्य तां (for निवार्य ताम्). — (L. 73) K_4 Dn_2 T_1 स (for सु-). D_5 पराच्छिनत् (for °भिनत्). D_6 संख्ये राजन्समाच्निनोत् (for the post. half). — K_4 om. line 74. — (L. 74) D_6 गदां गृह्य वृकोदरः (for the post. half). — (L. 77) $B_{1.4}$ Dn_1 D_6 दशभिर् (for समरे). — B_3 reads line 79 on marg. — (L. 79) D_6 दशभिर् (for विशिखैः). D_6 नाराचैरुत्स्मयन्निव (for the post. half). — (L. 80) D_6 महावीर्यो (for °राज). — (L. 81) D_6 ललाटेभ्यहनत्तूर्णं (for the prior half). Dn_1 शराणां नतपर्वणां ; D_6 शरेण नतपर्वणां (for the post. half). — (L. 83) After the prior half of line 83, Dn_2 ins. :

तां न रुत्य रणे वीरो द्रोणपुत्रो युधां मतिः ।

— After the above, Dn_2 **reads the post. half of** line 86. — (L. 86) D_5 तद् (for तं). D_5 रणाजिरे. D_6 अपनीतं महारथं (for the post. half).

25

D_4 om. line 1. — (L. 1) Ś K_{1-3} वंशद्वयं ; D_6 °वरौ ; D_7 वश्यध्वजौ (for वंश°). — (L. 2) D_{4-6} पृथिवीं (for पृथ्वीं स-). $Ś_1$ K_3 Dn_2 $D_{2.4-8}$ च (for तु). — (L. 3) D_1 अलं (for अक्षं). $D_{2.4.5.7.8}$ च (for तु). K_4 B_{3-5} Dn_2 $D_{3.6}$ शेषं नाम ; $B_{1.2}$ Dn_1 $D_{1.7.8}$ शेष(D_8 °ख)नागं (for शेषं नागं). — (L. 4) $D_{4.5.7.8}$ च (for तु). Ś K_2 पिनाकभृत् ; K_3 B_4 °धृत् (for °धृक्). — (L. 5) $Ś_1$ $K_{2.3}$ Dn_2 D_1 आणी ; $Ś_2$ वाणी ; B_5 तूणी- ; $D_{2.5}$ अणिं ; D_4 lacuna ; $D_{7.8}$ तूणौ (for अणी). D_2 [प]व शैवं च ; D_3 [पे]लपर्णं तु (for °त्रं च). K_1 अर्भकः ; B_5 शंकरः (for त्र्यम्बकः). — (L.

वेदान्कृत्वाथ चतुरश्चतुरोऽश्वान्महेश्वरः ।
उपवेदान्खलीनांश्च कृत्वा लोकत्रयेश्वरः ।
गायत्रीं प्रग्रहं कृत्वा सावित्रीं च महेश्वरः । [10]
कृत्वोंकारं प्रतोदं च ब्रह्माणं चैव सारथिम् ।
गाण्डीवं मन्दरं कृत्वा गुणं कृत्वा च वासुकिम् ।
विष्णुं शरोत्तमं कृत्वा शल्यमग्निं तथैव च ।
वायुं कृत्वाथ वाजाभ्यां पुङ्खे वैवस्वतं यमम् ।
विद्युत्कृत्वाथ निश्राणं मेरुं कृत्वाथ वै ध्वजम् । [15]
आरुह्य स रथं दिव्यं सर्वदेवमयं शिवः ।
त्रिपुरस्य वधार्थाय स्थाणुः प्रहरतां वरः ।
असुराणामन्तकरः श्रीमानतुलविक्रमः ।
स्तूयमानः सुरैः पार्थ ऋषिभिश्च तपोधनैः ।
स्थानं माहेश्वरं कृत्वा दिव्यमप्रतिमं प्रभुः । [20]

---

6) B2 (marg.). 3. 5 Dc1 (marg.) D6–8 युगं (for यूपं). K1. 3. 4 B2–5 Dc1 Dn D3 तु ; B1 [अ]थ (for च). Ś K1. 2 D1 अविनाहं ; D6 अधो नाहं ; D7. 8 अपि नाहं (for अवनाहं). D4 विनाहं तव तक्षकं (for the post. half). — (L. 7) D2. 3. 7. 8 योक्त्राण्यगानि ; D4 पुण्योक्तांगानि ; D6 यज्ञांगानि च (for योक्त्राङ्गानि च). K2. 4 B1. 2. 5 Dn2 D5 सत्त्वानि ; B3 Dc1 (before corr.) Dn1 सर्वाणि ; B4 भूतानि ; Dc1 (by corr.) सार्पाणि ; D6 षट्ट् चापि (for चत्वारि). D1. 6 कृत्वा सर्वः ; D4. 5. 7. 8 सर्वं कृत्वा (for कृत्वा शर्वः). — (L. 8) B3. 4 D3 तु ; D2 नु ; D4. 5. 7. 8 च (for [अ]थ). K1 चत्वारश् (for चतु°). D6 वेदान्कृत्वा चतुरगांश्च (for the prior half). K4 B5 D2 चतुरश्वान् ; D6 °रश्च (for °रोऽश्वान्). — K3 D2 om. (hapl.) lines 9–10. — (L. 9) K1 D1 खलीनां च ; B2 (marg. as above) मुनीनां च ; D4. 5. 7. 8 खलीनं च ; D6 °नानि (for °नांश्च). D1. 7 लोकं ; D6 लोके (for लोक-). K1. 2 D1. 4–8 -महेश्वरः (for -त्रये°). — K2 om. (hapl.) line 10. — (L. 10) B2 नरेश्वरः (for महे°). — (L. 11) Ś2 D7 ब्राह्मणं (for ब्रह्माणं). D3 चापि (for चैव). — (L. 12) Ś K1. 2 D1 गांडिवं ; D4. 7. 8 गांजी(D7 °जि)वं (for गाण्डीवं). D5 धनुषं (for मन्दरं). K4 B3–5 Dc1 Dn1 D2 तु (for च). — (L. 13) K1 शरोत्तरं (for °मं). — (L. 14) D3 त्वाष्ट्रं (for वायुं). B2 Dc1 Dn1 D3 तु ; D4. 5. 7. 8 च (for [अ]थ). K1 पत्राणि (for वाजाभ्यां). K1 मुखं (for पुङ्खे). — (L. 15) B1. 4 Dn1 [अ]थ (Dn1 तु) निर्याणं ; B3 तु निश्राणं ; D2. 4–8 परित्राणं (for [अ]थ निश्राणं). Ś K1–3 D1 विंध्यं कृत्वा च विश्रामे ; D3 विद्युतं चैव निश्राणं (for the prior half). Ś2 K1. 2 D1. 5 च ; B3 D3 तु (for [अ]थ). — (L. 16) D6 देवः (for दिव्यं). D4. 5. 7. 8 आरुरोह रथं देवः (D5 तूर्णं) (for the prior half). B1 -वेदमयः ; B4 -देवमयः (for °यं). D2. 4. 5. 7. 8 शुभं (for शिवः). — (L. 18) D7. 8 शांतिकरः (for अन्तकरः). — (L. 19) Dc1 Dn1 D3 मुनिभिश् (for ऋषि°). — (L. 20) Ś2 K1. 2 Dn1 D5. 7 महेश्वरं (Ś2 °रः). K2. 4 Dn2 D1. 2. 5. 8 विभुः ; D3 भुवि (for प्रभुः).

CRITICAL NOTES AND CORRECTIONS

1

9 [a]) संसाद्य. Cd संशोच्येति पाठश्चिन्त्यः.

27 [ab]) स्वाधर्षा, obviously सु+आधर्षा 'well assailable', because the lion of the mountain-cave is killed. Though the reading is documented by a small minority of MSS. (K1. 4 B2. 4. 5 Dn2 D3. 4) it is suggested by सुधर्षा of D6 G1 M and supported by Cd.

29 [d]) द्रष्टुमावभौ. This periphrasis is apparently an idiomatic expression, in which *draṣṭum* does not mean 'to see' but 'for being seen'.

49 [a]) तत्खण्डं पूरयामास 'filled up the gap' laid open (*apāvṛta*) by the fall of Bhīṣma. The phrase recurs in 7. 42. 6[c]. Cf. also 7. 101. 38[c] तत्खण्डं पित्र्यमाविशत्.

2

25 [a]) नागकक्ष्या. Usually the expression means elephant-girdle. Monier-Williams renders (see under हस्ति) the word as 'lion' or 'tiger', with which view E. W. Hopkins (*Position of the Ruling Caste in Ancient India* in *JAOS*, xiii, 1888, p. 245) agrees. For this sign on Karṇa's banner see 7. 6. 9[c]; 80. 12[a]; 8. 7. 7[d] etc. — [b]) The *v. l.* to जैत्रं च मे are obviously meant to regularise a defective Vātormi Pāda, just as S *v. l.* to दास्याम्यहं in 22[d] is meant to recitfy a defective Śālinī Pāda. Such attempts at modification *metri causa*, especially in Triṣṭubh-Jagatī verses, are numerous and need not be specified further.

29 [b]) वीरकांस्यं. By this word is generally meant 'garland (Dev. माला) used in Svayaṃvara' as in 1. 176. 30[ab] where the qualifying adjective काञ्चन corresponds to हैम here. The Śāradā MS. of Devabodha's commentary (ed. Dandekar, p. 106) on 1. 176. 30, however, adds on the margin: वीरकांस्यं स्वयंवरार्थे मालास्थापनं भाजनं; if this is accepted, it would explain both पूर्ण and काञ्चनं in the present passage. Secondarily, the word would mean an auspicious garland betokening victory, as in 7. 87. 62[a]; but in the present passage, in view of माला in the next line, this sense would not be suitable. V. Pisani (*Vāk*, ii. p. 22) refers to the Ādi-parvan passage and gives 'crown' as the meaning of the word; but there is nothing to support his interpretation. — The sight of Kanyā as *prāyātrika* is considered auspicious by the Smṛtis. The idea recurs in a similar context in 7. 58. 20[c]; 87. 63[d]. — The large crop of variants for this line shows that the real purport was missed. Even Devabodha (on 7. 87. 62[a]) explains वीरकांस्यं as वीरपेयं मद्यं, अर्घविशेषः, against what he himself says elsewhere!

3

The incident of Bhīṣma-Karṇa interview occurs briefly also in 6. 117.

23 [c]) दृष्टिहरं सुघोरं. Cf. चक्षुर्हणं वीरं in 7. 124. 22[a]; तेजोहरं दृष्टिविषं सुघोरं in 5. 16. 26[a].

5

3 [c]) अर्थपतिः. Cd अनुपतिः (sic) प्रधानस्वामी; Ca अर्थपतिः प्रधानस्वामी.

8 [a]) न *ऋते. Our emendation consists merely of the restoration of hiatus which various groups of MSS. attempt to avoid. Similar examples of hiatus are not rare; cf. च ऋचिकः 1. 1. 40[c]; अस्य ऋत्विजः 1. 33. 18[b]; ऋषिश्च ऋषिपुत्रश्च 1. 76. 18[c]; राजेन्द्र ऋषयश्च 5. 149. 29[cd]; etc. — For other such emendations in this book to restore hiatus see 7. 13. 35[d]; 43. 10[b]; 47. 27[a]; 137. 23[d].

17 [d]) शुक्राङ्गिरसदर्शनात्. दर्शन (at the end of a compound) = aspect or appearance. Cf. नारदादेवदर्शनात् 1. 2. 98[b]; बहुगन्धर्वदर्शना 5. 114. 3[b]. Dev. strangely explains: दर्शनान्नीतिशास्त्रात्!

24 [c]) भवन्नेत्राः. Cd भवन्नीता इति प्रायशः पाठः. Cf. 7. 74. 37[c].

30 [b]) Read विस्फारयन्.

40 [b]) Cd सुभगानर्तितैः सौभाग्यवतीनृत्यैः। सुभदानर्तितैरिति प्रायशः पठन्ति.

6

4–5. Kṛtavarman, a Vṛṣṇi prince, son of Hṛdika, joined Duryodhana with an Akṣauhiṇī of troops (5. 19. 17), as also did the Kāmboja Sudakṣiṇa (5. 19. 21).

15 It is curious that the Krauñca-Vyūha of the Pāṇḍavas is arranged by Yudhiṣṭhira, and not by Dhṛṣṭadyumna, the commanding officer (Senāpati), as is done correspondingly and rightly by Droṇa. Though the official commander, Dhṛṣṭadyumna is neither the chief leader nor director of the fight. On Vyūhas generally see Hopkins, *op. cit.*, p. 212.

42 ^{c}) अलातचक्रवत्. Cf. 7. 95. 25^{c}.

7

17 ^{d}) गावः शीतार्दिता इव = 134. 25^{d}; Cf. 130. 6^{cd}.

25 ^{c}) Śaibyātmaja is possibly Auśīnara Śaibya (7. 9. 65), grandson of Śibi Auśīnara mentioned in 7. 118. 30. In that case, who is Śibi also mentioned here (S variant Śaibya), as also in 7. 15. 32 (S variant Śala) and in 7. 130. 14 (*v. l.* Śaibya). This Śaibya Auśīnara, who sided with Yudhiṣṭhira and attacked Droṇa, is probably to be distinguished from Śaibya Govāsana (7. 70. 38 ; 6. 17. 20 and notes thereon) fighting in the army of Duryodhana. — A Kāśīpati, who was an ally of Yudhiṣṭhira (7. 7. 28), is mentioned in 5. 49. 38, and his horses described in 7. 22. 31 ; but he should be distinguished from the Kāsīrāja whose son was attacked by Dhṛṣṭadyumna (7. 9. 56), Kāśīśa mentioned in 9. 2. 17 among the allies of Duryodhana, as well as from Kāśya Abhibhū (6. 89. 12 ; 7. 22. 19, 34 ; 70. 38), or simply Kāśya (7. 24. 43 ; 5. 168. 21).

8

7 ^{a}) अस्त्रं चतुर्विधं. Dev. explains : युक्तायुक्तं करयुक्तम् अस्त्रयुक्तं चेति ; Arj. युक्तायुक्तम् अयुक्तम् अवयुक्तम् अन्तयुक्तम्. But in Udyoga अस्त्र (5. 30. 10) and धनुर्वेद (5. 155. 3 ; 193. 57) are described as *catuṣpād*, the four parts of the science of archery being described there by Dev. as मन्त्रोपचारमोक्षसंहाराश्चत्वारः पादाः. — ^{c}) Cd reads इष्वासधरं.

8 ^{b}) वैयाघ्रपरिवारणं. The epic war-chariot, like its Vedic forerunner, appears to have been provided with a kind of guard or fence-ring (*varūtha*) to prevent warriors from falling down when engaged in action. The description suggests that the fence-ring was covered with or made up of tough leather like the skin of tiger or elephant. Cf. व्याघ्रचर्मपरीवारा वृताश्च द्वीपिचर्मभिः 5. 152. 6^{cd}. See *ABORI* xxvi, 1945, pp. 286–87. The expression is very often used, as in 5. 81. 18 ; 138. 21 ; 179. 10, etc.

21 ^{ab}) = (var.) 31^{ab}.

9

8 ^{cd}) वाशितासंगमे. Cf. 7. 117. 20, 31 ; 134. 47 ; 152. 15 etc.

38 ^{a}) महारथसमाख्यातं = 106. 3^{c} ; °समाख्यातौ 105. 26^{c}. Cf. 8. 23. 37^{a}.

39 ^{a}) Note the peculiar double crasis in एकोपसृत्य ; similar instances in तपसोग्रस्य 1. 170. 14, ततोल्काश्रमे 5. 187. 25, अप्सरोपमाः 6. 7. 30, हतोन्क्रुष्टः 12. 92. 17, ततोपदिष्टं 12. 124. 29. — ^{c}) Dhṛṣṭaketu son of Śiśupāla, deserted the Cedis and alone joined the Pāṇḍavas, just as Yuyutsu, son of Dhṛtarāṣṭra and a Vaiśyā, alone went over to the Pāṇḍavas (7. 22. 27). Dhṛṣṭaketu is mentioned as a Mahāratha (5. 168. 8) and referred to as Śaiśupāli in 5. 49. 41 ; 7. 34. 5 ; 101. 22, 28 etc.

51 ^{c}) अनाधृष्टि 'superior to any check'. The ŚK reading अनावृष्टि makes no sense.

64 ^{b}) संस्थास्नुचारिषु. P W takes this as a wrong form for स-स्थास्नु-चारिषु 'along with movables and immovables'. Dev. on 1. 179. 11 (संस्थानचारिषु) explains the phrase as मरणधर्मकेषु. In 3. 207. 12 the reading is संस्थानचारिषु (*v. l.* सस्थास्नु°, सस्थाणु°). But the reading given by us is well documented, among other MSS. by Ś and most K.

10

10 ^{d}) अवहत्. Dev. takes it in the sense of आवहत् (= ऊढवान्), which is actually the B variant. आ + √वह् = to bring home a bride in 5. 145. 18. See on this word, ABORI, xxvi, 1945, p. 213.

18 ^{b}) अश्वशक. *Ś Br.* appears to use this word to signify 'excrement of a horse'! Here it seems

to mean a particular (disgusting?) tribe of Śakas who were horse-riders (cf. अश्वपुरुष in 6. 1. 7).

25 [d]) चागमत्. Ca. d read अगमं (= अवगतवानहं) which is not well supported by MSS. and remark : आगमादिति पाठश्छिन्त्यः.

11

22 [d]) एकायनगतः. According to commentators एकायन = 'sole object' of thought signifies the way of death. Dev. Arj. explain : एकं मरणमेवायनं मार्गो यस्य. This meaning would suit the word in 8. 29. 31.

13

8–18 The elaborate likening of a battle-field of slaughter to a river or sea is a bizarre epic simile, which occurs frequently in this Book, e. g., 7. 15. 42–43; 19. 60–61; 20. 31–37; 48. 49–50; 68. 47; 74. 51–53; 83. 29–30; 89. 11–15; 95. 2–4; 113. 15; 131. 119–23; 162. 15–16; etc.

12 [c]) शरीरदारुशृङ्गाटां. The dead bodies wallowing in blood are compared to Śṛṅgāṭas floating in water. The Śṛṅgāṭa, (called Singhārā or Siṅgāḍā in most North Indian languages, and Pāni-phal 'water-fruit' in Bengali) designates an aquatic plant (Trapa bispinosa); but the comparison here is to its turbinate triangular nut of blackish brown colour and ligneous texture (hence the appropriateness of the expression दारु). The S reading °संघाटां 'assemblage' is a colourless *lect. fac.*, which does not explain दारु satisfactorily, although शरीरसंघाटां occurs with *v. l.* in a similar context in 7. 20. 36[c]; 48. 49[a], the word संघाट, corresponding to संबाध in 7. 13. 18[a] or संघात (N *v. l.*) in 48. 49[a]. It is noteworthy, however, that संघाटिका is another name of the aquatic plant Trapa bispinosa.

15 [b]) प्राणिवाणिजसेवितां. The meaning is not clear, although the reading is more or less certain. The *v. l.* °वारिज° is facile and weak. According to Monier-Williams वाणिज = submarine fire; but the difficulty is that the sea is supposed to contain submarine fire, and not a river. If, however, we take वाणिज in the ordinary sense of a merchant, we can say that the creatures (gṛdhra, śṛgāla etc.), which roam about in the battle-field, are likened to merchants who trade in corpses. The fact that these creatures are mentioned again in 16[c] need not present a serious objection, for *jhaṣa* is repeated in 13[b] and 16[b].

29 [d]) लाडयन्. Recurs in 7. 28. 6[c]. This peculiar (Prakritic) root *laḍ* (or caus. *lāḍ*) 'to toss' or 'to throw' is, as variants in both places show, obviously not relished. It is, however, recognised in the Dhātupāṭha, although not listed in Whitney's *Roots*.

45 पौरव. Mentioned as a Mahāratha in the army of Duryodhana in 5. 164. 19–20. He is perhaps the same as Paurava Bṛhatkṣatra (King of Aṅga) mentioned in 7. 31. 63 (S. *v. l.* Naiṣadha), although the name is given as Vṛddhakṣatra in 7. 171. 56; 172. 9. He appears to have been slain by Aśvatthāman (7. 171. 64). He should be distinguished from the Saindhava Vṛddhakṣatra, father of Jayadratha (7. 121. 17), and Kekaya Bṛhatkṣatra (7. 22. 17; 82. 1), slain by Droṇa (7. 101. 5, 22).

50 [f]) Śarāvara or Śarāvaraṇa (7. 13. 66; 6. 86 36) = 'arrow-guard' or shield. Dev. चर्म, but कवच in 7. 171. 50; Hopkins, *op. cit.*, p. 304.

57 [a]) बर्हिणमहावाजं. The Carman (shield) was, like an arrow, amply feathered (महावाज) with peacock plumes (बर्हिण) as an ornamentation. As the epithet applies normally to an arrow, ŚK reading, perhaps perceiving the incongruity, altogether omits *vāja* (= feather of an arrow) and changes it to बर्हि; बर्हवितत 'covered with peacock feather'.

59 [b]) The expression प्रवेरित 'cast away, hurled' is already authenticated by its use in 1. 17. 23; 68. 73; 5. 173. 5, as well as in 7. 2. 15 (प्रवेरयन्); 140. 32; 142. 8. The variants show that it was considered an unusual word, probably formed irregularly as प्र + अव + ईरित. See PW and notes on Udyoga p. 737 and ABORI, xxvi, 1945, pp. 289–90.

61 [a]) वृद्धक्षत्रस्य दायादं. Refers to Jayadratha.

80 [c]) आर्तायनि = Śalya, son of Ṛtāyana. A curious etymology of the name is given in 8. 23. 44.

14

23 [d]) पुष्पिताविव किंशुकौ. A simile often repeated : 6. 43. 13[d]; 7. 47. 4[d]; 71. 17[d]; (var.) 83. 20[d]; (var.) 99. 10[d]; 111. 22[d]; 137. 9[d]; etc.

15

7 [a]) Śatānīka, son of Nakula, should be distinguished from Śatānīka, younger brother of Virāṭa (7. 20. 20; 4. 30. 10). The latter, curiously enough, is said to have been slain by Bhīṣma in 6. 113. 24, but he meets with death again at the hands of Droṇa in 7. 20. 22 and of Śalya in 7. 142. 27 !

32, 37 Vyāghradatta Pāñcālya, who is mentioned as a warrior in the army of Yudhiṣṭhira in 5. 168. 18, is slain here by Droṇa. He should be distinguished from Vyāghradatta, son of the Magadha king, in the army of Duryodhana, who is slain by Sātyaki (7. 81. 14; 82. 32). — Siṁhasena, the Pāṇḍava warrior, killed here by Droṇa, may or may not be the same as Pāñcāla Siṁhasena, son of Gopati, whose horses are described in 7. 22. 43. There is another Siṁhasena who fought with Karṇa (8. 40. 46).

16

2 [d]) अवहार, a regular term for cessation of fight, 5. 183. 27[a] ; 7. 32. 3[a].

19 [a]) तुण्डकेर. Kṣemendra gives the name as तुण्डिल. — [cd]) Suśarman, king of the Trigartas, was evidently not killed by Arjuna in 6. 100. 1 (see notes thereon); and perhaps he survived among the Saṁśaptakas until he was killed by Arjuna in 9. 26. 43. His brothers are mentioned in 7. 17. 20; but no brother of Suśarman appears with the name of Śatānīka, as Jacobi supposes. Prasthala appears to be a clan of the Trigartas; in 8. 30. 391* N reads Prasthala among people of blamable behaviour.

20 [a]) मावेल्लक. In spite of confusing variants this seems to be the most acceptable form of the name. See *v. l.* on the word in 8. 4. 47[a] and the editor's notes thereon, p. 678. —Kṣemendra has ललित for ललित्य; also त्रिगर्वराज for त्रिगर्त°.

29–36 The oath-taking of the Saṁśaptakas may be compared to that of Arjuna in 7. 51. 24–37.

32 [ab]) The Smṛti injunctions clearly forbid cohabitation with a woman in menstruation (*rajasvalā*); hence the qualification मोहात्, which word the *Varāha-purāṇa* (ed. Venkatesvara Press, 142. 41) also employs in a similar context. But the period (*ṛtu-kāla*) is extended usually to 16 days, of which the first four days are to be avoided (Manu. 3. 45–46). This view is apparently accepted by S reading; and the Ṛtukāla in this extended sense is employed in 7. 55. 28[ab]. — [c]) श्राद्धसंगतिकानां. People who assemble at a funeral ceremony and partake of food are deprecated; e. g. in *Padma-purāṇa* (ASS. ed., Ādi-kāṇḍa 56. 11 = *Kūrma-purāṇa* 1. 17. 11[b]–12[a]; Caṇḍeśvara's *Gṛhastha-ratnākara*, p. 344). D3 appears to take संगति in the sense of *saṁgama* (sexual intercourse), hence the *v. l.* श्राद्धमैथुनिक. Dev., however, curiously explains in his commentry: अहं त्वदर्थं करोमि त्वमपि मदर्थं भविष्यसीति कृतसमयानां.

34 [b]) The occurrence of the word होरा, which is sought to be replaced in BS by the *lect. fac.* मातृ, is interesting; but the sense is obscure. Usually, होरा (Greek *hōrā*, an hour) means the rising of a zodiacal sign at a particular time or its resulting effect; but this meaning is here incompatible, unless the sense intended is 'ignoring the particular zodiacal sign'. Is it possible that it has been used here as equivalent to Greek *hēlios* and signifies the sun ?

38 [d]) अपदान्तरं = तत्क्षणं (Dev.).

44 Satyajit is mentioned as a son of Drupada in 5. 168. 22. He is slain by Droṇa in 7. 20. 16.

17

19 [a]) हस्तावाप 'hand-guard' should be distinguished from हस्तवाप (in 5. 23. 21) 'hand-throw' (Dev. मुष्टि), which signifies shooting of several arrows at once. The word recurs in 7. 78. 28[b]; 96. 34[ab] = 140. 28[ab]; 99. 24[b]; 137. 28[d]; 145. 42[c] etc. See Hopkins, *op. cit.*, p. 262, 273.

31 [c]) कृत्वा मृत्युं निवर्तनं 'making death the (cause of) retreat' (निवर्तनं = निवर्तनहेतुं), or 'making retreat (equivalent to) death', *i. e.*, desisting from fighting only in death. Dev. (on 6. 53. 2) explains : स्वस्य परस्य वा मृत्युरेव निवर्तकः. The phrase recurs in 7. 127. 20[b]; 171. 39[d].

18

10 [a]) The spelling भृकुटी or भृकुटि, which occurs

also in 5. 103. 36, appears to be well documented here.

11 [ab]) त्वाष्ट्रमस्त्रं. Mentioned again in 132. 29, along with Vāruṇa, Yāmya, Āgneya and Sāvitra weapons : in 163. 28, along with Aindra, Pāśupata, Vāyavya and Vāruṇa.

22 [b]) भावज्ञोऽऽज्ञाय. This is one of the instances of irregular epic Visarjanīya Saṁdhi of *as*+*ā* resulting in *o*, as in रजोऽऽभीलं 7. 74. 52. Such Saṁdhis with the word *ātman* (or Ved. *tman* ?) (e. g. सोऽऽत्मानं 5. 149. 42; मूर्छान्वितोऽऽत्मानं 7. 153. 12) are common enough, but we have also राज्ञोऽऽज्ञया 1. 168. 21; ततोऽश्रमेधिकं 1. 2. 66; सोऽस्तीको 1. 49. 17; यौवनगोऽऽसुखे 1. 71. 22; जलधारामुचोऽऽकुलान् 1. 218. 14; संभृतोऽऽश्रमवासिना 5. 164. 6 (no *v. l.*).

35 [c]) आक्रीड इव रुद्रस्य. Cf. रुद्रस्याक्रीडसंकाशः 7. 100. 39[c].

19

6, 13 Some of the warriors mentioned here are not known elsewhere; hence the large number of variants with regard to the forms of these names. By Naiṣadha is perhaps meant Naiṣadha Bṛhatkṣatra mentioned above (note on 7. 13. 45). Karakarṣa is mentioned in 5. 49. 43 as following Śarabha, brother of the Cedi king; in 6. 80. 31 he is a Pāṇḍava warrior who rescued Cekitāna !

7 [d]) हंसपद. If they are the same people as हंसमार्ग mentioned in 6. 10. 68, then the BS reading हंसपथ would be preferable.

35 [d]) मरीच्यः. N does not approve of this S transference of fem. *i*- to *ī*- stem. But this is not unusual in the epics, e. g., शक्त्यः (weapon) 5. 139. 40; 7. 138. 18; शक्ती 5. 152. 3; आयती 5. 39. 7; 7. 134. 56; स्मृती Rām. 5. 15. 33, etc.

20

35 [d]) मांसशोणितकर्दमा. One of the frequent epic descriptive phrases, e. g., 6. 50. 94[b]; 162. 15[d]; 164. 82; 9. 14. 17[b]; 11. 16. 55[d]; etc.

40 [b]) प्रभिन्न इव कुञ्जरः = 7. 21. 4[b] (acc. sing.) = 7. 38. 28[b] = 9. 56. 59[d]. Cf. 7. 9. 8[a]; 68. 52[e].

43 Curiously enough, we are told that Vasudāna was killed later by Droṇa (7. 164. 84). G1 M perhaps perceived this incongruity and changed the reading accordingly.

46 [b]) The S reading कितव, accepted in our text as an epithet of Yudhiṣṭhira, is interesting. N seeks to avoid this blunt reference to the king's addiction to gambling, but Dev. supports S reading, which does not want to mince matters.

21

27 [c]) काका इव महानागं. Dev. reads कोकाः and explains it as पिपीलिकाः । महानागं महासर्पं ॥ अथवा कोका वृकाः, महानागं महागजं. Arj. agrees.

22

19 Abhibhū is the proper name; see 7. 61. 40; 70. 38. Hence the reading अभिभूः in 7. 22. 34 would appear preferable; but Abhibhū is the name of Kāśya and not of his son.

21 Sutasoma, whose origin is described, was the son of Bhīma (Pārtha) and Draupadī, just as Prativindhya of the previous stanza was the son of Yudhiṣṭhira and Draupadī. The other three sons of Draupadī by the Pāṇḍavas are mentioned in 23–25.

27 [c]) The K reading महाकर्का (for महाकाया), supported by **Cd**, is a notable variant; for कर्क means 'a white horse', as in 7. 107. 26. Both Amarakośa and Abhidhāna-cintāmaṇi mention कर्क as the synonym of a white horse.

29 Sörenson suggestes that Saucitti is the patronymic of Satyadhṛti mentioned in 5. 168. 17; but this is not borne out by 6. 89. 12; 7. 22. 29, 32, 34, 48 (Satyadhṛti Kṣaimi), where they appear as names of separate warriors.

46 [a]) Dev. भद्रकाः श्वेतखुराः. Cf. भद्रकाराः in 58[a].

51 Śaibya Citraratha should be distinguished from (Pāñcāla) Citraratha, brother of Virāṭa, mentioned in 7. 98. 37, as well as from Śaibya Auśīnara.

53 [c]) पटच्चरहन्तारं. Cf. 7. 24. 32[c]. The word पटच्चर, literally meaning a thief or robber, probably denotes a people here.

58 [b]) शरदण्डानुदण्डजाः. The S reading शरदण्ड-

(काण्ड)निभा हयाः merely repeats 46^b, and adopts here the reading दण्डधार of 46^d (for दण्डकेतु). If the expression, as Ca. d imply, indicates horses of different regions (Cv देशविशेषोद्भवाः), then शरदण्ड and अनुदण्ड would be names of different countries. We know nothing of Anudaṇḍa, but Śaradaṇḍa was the name of a country belonging to Śālva in Madhyadeśa (Kāśikā on Pāṇini IV. 1. 173). Nīlakaṇṭha reads शरदण्डानुदण्डयः and explains : शरदण्डः शरप्रकाण्ड इव अनुदण्डिः पृष्ठवंशो येषां, सितगौरपृष्ठा इत्यर्थः. This is ingenious; but अनुदण्डि in this sense is not recorded independently anywhere, and appears to be a facile invention of the commentator.

24

22 ^{b}) In 7. 19. 6 the form of the name is Bhūtavarman, which is given by S reading here. Sabhāpati is not a designation but the proper name of a warrior, who is mentioned again in 8. 65. 28 as fighting against Arjuna.

